52. The above-mentioned affixes have also the

sense of "what is capable of holding that; or takes away that, or cooks that."

The word तद् is understood here, showing that the word in construction to which the affix is to be added should be in the accusative. The word संभव means the *capacity* to hold the exact quantity; अवहार means 'taking away, or containing.' Thus प्रस्थं संभवति = प्रास्थिकः 'a vessel capable of holding a Prastha measure.' So प्रस्थमवहरति or पचति = प्रास्थिकः 'a vessel or a person that takes away, holds or cooks a Prastha measure.' Similarly कौडविकः and खारीकः ॥ The word संभव does not govern the word पचति, thus प्रस्थं पचति ब्राह्मणी = प्रास्थिकी 'Brâhmanî who cooks a Prastha.'

Vârt:—The affix अण् also comes after the word द्रोण in the sense of 'who cooks that.' e. g. द्रोणं पचति ब्राह्मणी = द्रौणी or द्रौणिकी ॥

आढकाचितपात्रात्खोऽन्यतरस्याम् ॥ ५३ ॥ पदानि ॥ आढक, आचित, पात्रात्, खः, अन्यतरस्याम् ॥

वृत्तिः ॥ आढकाचितपात्रशब्देभ्यो द्वितीयासमर्थेभ्यो ऽन्यतरस्यां संभवादिष्वर्थेषु खः प्रत्ययो भवति ।

53. The affix kha (ईन) may optionally be added in the above sense of 'being capable of holding &c,' after the words âḍhaka, âchita, and pâtra.

This ख debars ठञ् which comes in the alternative. Thus आढकं संभवति, अवहरति, पचति वा = आढकीना or आढकिकी, आचितीना or आचितिकी, पात्रीणा or पात्रिकी ॥

द्विगोष्ठंश्च ॥ ५४ ॥ पदानि ॥ द्विगोः, ष्ठन्, च ॥

वृत्तिः ॥ आढकाचितपात्रादित्येव । आढकाचितपात्रान्ताद् द्विगोः संभवत्यादिष्वर्थेषु ष्ठन् प्रत्ययो भवति, चकारात्खश्च, अन्यतरस्याम् ॥

54. The affix shṭhan (⁄ — इक) as well as the affix ख (ईन) may optionally come, after the same words âḍhaka, âchita, and pâtra, being final of a Dvigu compound, the sense being that of 'what can hold, &c.'

The ख is read into the sûtra by the word च of the aphorism These two affixes ख and ष्ठन् being especially ordained, are not to be elided by V. I. 28. But when in the alternative, we add the general affix ठञ्, then it is elided by V. I. 28. The न् of ष्ठन् is for accent (VI. I. 19). and the ष् for ङीष् ॥ Thus we have 3 forms:—द्व्याढकिकी, द्व्याढकीना, or द्व्याढकी; द्व्याचितिकी, द्व्याचितीना, द्व्याचिता. In this case of द्व्याचिता the feminine is not formed by ङीप् (IV. I. 21) because of the specific prohibition contained in IV. I. 22. So also द्विपात्रिकी, द्विपात्रीणा and द्विपात्री॥

कुलिजाल्लुक्खौ च ॥ ५५ ॥ पदानि ॥ कुलिजात्, लुक्, खौ, च ॥

वृत्तिः ॥ द्विगोरित्येव कुलिजशब्दान्ताद् द्विगोः संभवत्यादिष्वर्थेषु लुक्खौ भवतः । चकारात्ष्ठंश्च अन्यतरस्याग्रहणानुवृत्त्या लुगपि विकल्प्यते ॥

55. After the word kulija, being the final of a Dvigu, there is optionally the elision of the above affixes, or the adding of the affix ख (इन), in the sense of 'what can hold that &c'

By च the affix ष्ठन् is also added. The elision being optional, the affix ठञ् V. I. 18 may *optionally* be elided by V. I. 28. Thus we get *four* forms: द्विकुलिजिकी (ष्ठन्), द्विकुलिजीना (ख), द्विकुलिजा (ठञ् लुक्), द्वैकुलिजिकी (ठञ्) ॥ In the last example, there is not vṛiddhi of the second term, though it was so required by VII. 3. 17. The anomaly is explained by holding that the word कुलिज should be included in the exception along with संज्ञा and शाण of VII. 3. 17.

सोऽस्यांशवस्नभृतयः ॥ ५६ ॥ पदानि ॥ सो, अस्य, अंश, वस्न, भृतयः ॥

वृत्तिः ॥ स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत् प्रथमासमर्थंमंशवस्नभृतयश्चेत्ता भवन्ति ॥

56. The affixes taught in V. 1. 18 &c have also the sense of 'this is his portion, price or pay.'

The सः shows that the case in construction is nominative. The word अंश means 'share,' वस्न means 'price,' भृति means 'wages.' Thus पंच अंशो वस्नो वा भृतिर्वास्य = पंचकः 'whose portion, price or pay is five.' So सप्तकः, साहस्रः ॥

तदस्य परिमाणम् ॥ ५७ ॥ पदानि ॥ तद्, अस्य, परिमाणम् ॥

वृत्तिः ॥ तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत् प्रथमासमर्थं परिमाणं चेत्तद्भवति ।

57. The affixes V. 1. 18 &c have the sense of "this is its measure."

The word तद् shows that the word in construction should be in the nominative case. Thus प्रस्थः परिमाणमस्य = प्रास्थिको राशिः 'a heap whose mass is a Prastha.' So also खारीकः, शत्यः, शतिकः, साहस्रः, द्रौणिकः, कौडविकः, वार्षशतिकः, वार्षसहस्रिकः ॥ So also षष्टिर्जीवित परिमाणमस्य = षाष्टिकः, द्विसाप्ततिकः ॥

Why the words तदस्य have been repeated in this sûtra, when their anuvṛitti could have been drawn from the last aphorism, the word सो ऽ स्य and तदस्य being the same? The repetition shows that the affixes are again ordained, so that the elision taught in V. I. 28 does not apply. Thus द्वे षष्टी जीवित परिमाणमस्य = द्विषाष्टिकः, द्विसाप्ततिकः, ॥ Here the affix is not elided by V. I. 28.

संख्यायाः संज्ञासंघसूत्राध्ययनेषु ॥ ५८ ॥ पदानि ॥ संख्यायाः, संज्ञा-संघ-सूत्र-अध्ययनेषु ॥

वृत्तिः ॥ तदस्य परिमाणमिति वर्त्तते । संख्यावाचिनः प्रातिपदिकात्परिमाणोपाधिकात्प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति । संज्ञासंघसूत्राध्ययनेष्विति प्रत्ययार्थविशेषणम् ॥

वार्त्तिकम् ॥ स्तोमे डविधिः पञ्चदशाद्यर्थः ॥ वा० ॥ शन्शतोर्डिनिश्छन्दसि ॥

वा० ॥ विंशतश्चेति वक्तव्यम् ॥

58. The affixes V. 1. 18 &c come after a word denoting a numeral, in the sense of "this is its measure," when the word so formed means a Name, a Multitude, a Book, or a fixed way and mode of study.

The phrase तदस्य परिमाणं is understood here. The word in construction to which the affix is to be added should be in the nominative case. When it is a Name, the affix does not change the sense of the radical. Thus पंचकाः =पंचः 'the Five' as पंचका शकुनयः, त्रिकाः 'the Three'=शालङ्कायनाः ॥ The sense of the primitive is changed when it means a संघ 'a multitude or flock'; as पंचकः संघः, अष्टकः ॥ So also when it means a सूत्र 'a Book', as, अष्टावध्यायाः परिमाणमस्य सूत्रस्य=अष्टकं पाणिनीयम् 'The Ashṭaka of Pâṇini viz, a Book comprising Eight Adhyâyas'. So also दशकं वैयाघ्रपदीयम्, त्रिकं काशकृत्स्नम् ॥ Is not a collection of Adhyâyas the same as संघः ? No, the word संघः is confined to a collection of living beings only.

The word अध्ययन means 'study'. Its numerical measure (संख्या परिमाण) means the particular number of times, or ways in which it should be read. Thus पंचकोऽधीतः 'what is studied five-times or in five modes' सप्तकोऽधीतः so also अष्टकः or नवकः ॥

Vârt:—The affix ड comes after the words पंचदश &c, when the word means a Stoma. As, पंचदश मन्त्राः परिमाणमस्य=पंचदशः स्तोमः, सप्तदशः स्तोमः &c. The indicatory ड् causes the elision of final (टि) by VI. 4. 143, in the cases of words like एकविंशः &c. In the case of पंचदशः the न् is elided by VI. 4. 144.

Vârt:—The affix डिनि comes in the Chhandas after words ending in शत् and शन्, as, पंचदशिनोऽर्द्धमासाः, त्रिंशिनो मासाः ॥

Vârt:—So also after the word विंशति, as विंशिनोऽङ्गिरसः ॥

पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ॥ ५९ ॥
पदानि ॥ पङ्क्ति, विंशति, त्रिंशत्,चत्वारिंशत्, पञ्चाशत्, षष्टि, सप्तति, अशीति, नवति शतम् ॥

वृत्तिः ॥ तदस्य परिमाणमिति वर्त्तते । पङ्क्त्यादयः शब्दा निपात्यन्ते । यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम् ।

59. The following words are anomalous: paṅkti 'a verse', viṅśati 'twenty', triṅśat 'thirty', chatvâriṅśat 'forty', pañchâśat 'fifty', shashṭhi 'sixty', saptati 'seventy', aśîti 'eighty', navati 'ninty', and śata 'a hundred'.

The words तदस्य परि.णम् are understood here also: पंक्ति is formed by adding ति to पंच, the final being elided, meaning 'a verse the measure of which is five', i. e. a half-quarter consisting of 5 syllables. The word विंशति is formed by adding शतिच् to the word विन् which replaces the two word द्वयो-

दशतः as द्वौ दशतौ परिमाणमस्य संघस्य = विंशतिः ॥ So the affix शत् comes after विन् representing द्वयोर्दशतः ; so for चतुर्णां दशतां we have चत्वारिन् and then add शत्, similarly with पंचाशत् ॥ Similarly with the rest.

Note :—All the rest appears to be the conjectural etymology of Patanjali and Kâsikâ-Kâra, and hence it is omitted.

The word पंक्ति also means 'a line'. As ब्राह्मणपङ्क्तिः, पिपीलिका पंक्तिः ॥ Here the sense has no relation to its etymology.

पञ्चद्दशतौ वर्गे वा ॥ ६० ॥ पदानि ॥ पञ्चत्-दशतौ-वर्गे-वा ॥

वृत्तिः ॥ पञ्चत् दशत् इत्येतौ निपात्येते तदस्य परिमाणमित्यस्मिन्विषये वर्गेभिधेये ।

60. The words pañchat and daśat in combination with varga, may be anomalously so formed, in the sense of 'this is its measure'.

This ordains डति instead of कन् V. I. 22, which also comes in the alternative. As पंचद्वर्गः, दशद्वर्गः or पंचकोवर्गः, दशकोवर्ग ॥

सप्तनोञ् छन्दसि ॥ ६१ ॥ पदानि ॥ सप्तनः, अञ्, छन्दसि ॥

वृत्तिः ॥ वर्गइत्येव । तदस्य परिमाणमिति च । सप्तन्शब्दाच्छन्दसि विषये ऽञ् प्रत्ययो भवति वर्गेभिधेये ।

61. The affix añ (±/—अ) comes after the word saptan, in the Chhandas, when the meaning is that of a Varga.

As सप्त साप्तान्यसृजत् ॥ The phrase तदस्य परिमाणं is understood here.

त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् ॥ ६२ ॥ पदानि ॥ त्रिंशत्-चत्वारिंशतोः, ब्राह्मणे, संज्ञायाम्, डण् ॥

वृत्तिः ॥ तदस्य परिमाणमित्येव । वर्गइति निवृत्तम् । त्रिंशच्चत्वारिंशच्छब्दाभ्यां संज्ञायां विषये डण् प्रत्ययो भवति, तदस्य परिमाणमित्येतस्मिन्विषये ब्राह्मणेभिधेये ॥

62. The affix ḍaṇ (±—अ) comes after the words triṅśat and chatvâriṅśat, in the sense of 'this is its measure', when it is the Name denoting a Brâhmaṇa-book.

The word वर्ग does not govern this sûtra. The indicatory ड् causes the elision of the last vowel with the consonant that follows it (VI. 4. 143). The force of the locative case in ब्राह्मणे is that of अभिधेय and not विषय, i. e. when the word means a Brâhmaṇa itself. Had the force been that of विषय, it would have meant, 'in the Brâhmaṇa literature'. As त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां = त्रैंशानि ब्राह्मणानि 'The Brâhmaṇa containing thirty Adhyâyas'. So चात्वारिंशानि ब्राह्मणानि ॥ These being the names of certain Brâhmaṇas.

तदर्हति ॥ ६३ ॥ पदानि ॥ तद्-अर्हति ॥

वृत्तिः ॥ तदिति द्वितीयासमर्थादर्हति इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति ॥

63. The affixes V. 1. 18. &c, have also the sense of 'who deserves that',

The case in construction here is accusative. Thus श्वेतच्छत्रमर्हति = श्वैतच्छत्रिकः "who deserves the White Umbrella". So also वास्त्रयुग्मिकः, शत्यः, शतिकः साहस्रः ॥

छेदादिभ्यो नित्यम् ॥ ६४ ॥ पदानि ॥ छेदादिभ्यः,नित्यम् ॥

वृत्तिः ॥ नित्यग्रहणं प्रत्ययार्थविशेषणम् । छेदादिभ्यो द्वितीयासमर्थेभ्यो नित्यमर्हतीत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति ॥

64. After the words छेद &c in the second case in construction, the above-mentioned affixes have the sense of "who deserves that under all circumstances".

Thus छेदं नित्यमर्हति = छैदिकः, so also भैदिकः ॥

1 छेद, 2 भेद, 3 द्रोह, 4 दोह, 5 नर्त (वर्त), 6 कर्ष, 7 तीर्थ*, 8 संप्रयोग, 9 विप्रयोग, 10 प्रयोग*, 11 विप्रकर्ष, 12 प्रेषण, 13 संप्रश्न, 14 विप्रश्न*, 15 विकर्ष*, 16 प्रकर्ष*, 17 विराग विरङ्गं च (from विराग is formed वैरङ्गिक), ॥

शीर्षच्छेदाद्यच्च ॥ ६५ ॥ पदानि ॥ शीर्ष-छेदात्,यत्, च ॥

वृत्तिः ॥ शीर्षच्छेदशब्दाद् द्वितीयासमर्थान्नित्यमर्हतीत्यस्मिन्नर्थे यत् प्रत्ययो भवति चकाराद्यथाविहितश्च ॥

65. The affix yat (यं) as well as the above affixes come after the word Śîrshachchheda in the accusative, in the sense of 'who deserves that under all circumstances'.

Thus शिरश्छेदं नित्यमर्हति = शीर्षच्छेद्यः, or शैर्षच्छेदिकः ॥ The word शिरस् is changed irregularly into शीर्ष before the affix.

दण्डादिभ्यो यः ॥ ६६ ॥ पदानि ॥ दण्डादिभ्यः, यः ॥

वृत्तिः । नित्यमिति निवृत्तम्॥ दण्डादिभ्यो द्वितीयासमर्थेभ्यो ऽर्हतीत्यस्मिन्नर्थे यः प्रत्ययो भवति । ठकोपवादः ।

66. After the words daṇḍa &c in the accusative, the affix ya comes in the sense of 'who deserves that'.

The word नित्य does not govern this sûtra. This य debars ठक् V. I. 19. Thus दण्डमर्हति = दण्ड्यः 'deserving to be killed'. मुसल्यः &c.

1 दण्ड, 2 मुसल, 3 मधुपर्क, 4 कशा, 5 अर्घ, 6 मेघ, 7 मेधा, 8 सुवर्ण*, 9 उदक, 10 वध, 11 युग, 12 गुहा, 13 भाग, 14 इभ, 15 भङ्ग*, ॥

Note.—The Sidhanta-Kaumudi gives the sûtra as दण्डादिभ्यो यत्; another version gives the sûtra as दण्डादिभ्यः only drawing the affix यत् from the last sûtra.

छन्दसि च ॥ ६७ ॥ पदानि । छन्दसि,च (यत्) ॥

वृत्तिः । प्रातिपदिकमात्राच्छन्दसि विषये तदर्हतीत्यस्मिन्नर्थे यत् प्रत्ययो भवति । ठञादीनामपवादः ।

67. The affix yat (य) comes in the sense of 'deserving that', in the Chhandas, after every prâtipadika.

This debars ठञ् &c. Thus उदक्यो वृत्तयः, यूप्यः पलाशः, गैर्त्यो देशः ॥ See VI. 1. 213.

पात्राद् घंश्च ॥ ६८ ॥ पदानि ॥ पात्रात्, घन्, च ॥

वृत्तिः । पात्रशब्दाद् घन् प्रत्ययो भवति चकाराद्यच्च, तदर्हतीत्यस्मिन्नर्थे । ठक्ठञोरपवादः ।

68. The affix ghan (⊥इय) together with yat (यं) comes in the sense of "deserving that", after the word pâtra.

This debars ठक् and ठञ् ॥ The word पात्र denotes measure also. Thus पात्रमर्हति = पात्र्यः or पात्रियः ॥

कडङ्करदक्षिणाच्छ च ॥ ६९ ॥ पदानि ॥ कडङ्कर-दाक्षिणात्, छ, च ॥

वृत्तिः । कडङ्करदक्षिणाशब्दाभ्यां छः प्रत्ययो भवति, चकाराद्यच्च तदर्हतीत्यस्मिन्विषये । ठकोपवादः ।

69. The affix chha (ईय) as well as yat (यं) comes in the sense of 'deserving that', after the words kaḍaṅkara and dakshiṇâ.

This debars ठक् ॥ Thus कडङ्करमर्हति = कडङ्करीयः or कडङ्कर्यः 'one deserving straw' such as a cow. So also दक्षिणीयः or दक्षिण्यो ब्राह्मणः 'a Brahmaṇa deserving alms.'

स्थालीबिलात् ॥ ७० ॥ पदानि । स्थालीबिलात्-(छ-यतौ)

वृत्तिः । छयतावनुवर्त्तेते । स्थालीबिलशब्दाच्छयतौ प्रत्ययौ भवतः तदर्हतीत्यस्मिन्नर्थे । ठकोपवादौ ।

70. The affixes chha (ईय) and yat (य) come in the sense of 'deserving that,' after the word sthâlîbila.

This debars ठक ॥ Thus स्थालीबिलीयास्तण्डुलाः or स्थालीबिल्याः 'rice deserving the pot' i. e. cookable rice.

यज्ञर्त्विग्भ्यां घखञौ ॥ ७१ ॥ पदानि । यज्ञ-ऋत्विग्भ्याम्-घ-खञौ ॥

वृत्तिः । यज्ञशब्दादृत्विक्शब्दाच्च यथासंख्यं घखञौ प्रत्ययौ भवतः तदर्हतीत्यस्मिन्विषये । ठकोपवादौ ।

वार्त्तिकम् ॥ यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् ॥

71. The affixes gha (इय) and खञ् (±'—ईन) come respectively after the words yajña andṛitvija, in the sense of 'deserving that.'

This debars ठक् ॥ Thus यज्ञियो ब्राह्मणः 'a Brâhmaṇa worthy of honor at a sacrifice.' आर्त्विजीनो ब्राह्मणः ॥

Vârt:—After the words yajña and ṛitvija, these affixes have also the sense of "deserving the performance thereof". Thus यज्ञकर्मार्हति = यज्ञियो देशः 'a place fit for the performance of sacrifice.' ऋत्विक् कर्मार्हति = आर्त्विजीन ब्राह्मणकुलम् ॥

Here ends the governing power of ठक् V. 1. 19: hence forward is the government of ठञ् V. 1. 18.

पारायणतुरायणचान्द्रायणं वर्त्तयति ॥ ७२ ॥ पदानि ॥ पारायण-तुरायण-चान्द्रायणम्, वर्तयति (ठञ्)

वृत्तिः । समर्थविभक्तिरनुवर्त्तते । अर्हतीति निवृत्तम् । पारायणादिभ्यो द्वितीयासमर्थेभ्यो वर्त्तयतीत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति ।

72. The affix ṭhañ (+/—इक V. 1. 18) comes in the sense of 'who performs this', after the words pârâyaṇa, turâyaṇa and châṇdrâyaṇa, being in the 2nd case in construction.

The force of अर्हति ceases. Thus पारायणिक छात्र 'a pupil, who reads under a teacher': तौरायणिको यजमानः, चान्द्रायणिकस्तपस्वी ॥ The word पारायण means a 'teacher' (परस्य करोति) ॥

संशयमापन्नः ॥ ७३ ॥ पदानि ॥ संशयम्-आपन्न (ठञ्) ॥

वृत्तिः । संशयशब्दाद् द्वितीयासमर्थादापन्न इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति ।

73. The affix ṭhañ (+/—इक) comes after the word sañśaya in the accusative construction, the sense being "fallen into this, or thrown into it".

Thus संशयमापन्नः प्राप्तः = सांशयिकः स्थाणुः "a doubtful pillar", i. e. in a precarious state.

योजनं गच्छति ॥ ७४ ॥ पदानि ॥ योजनम्-गच्छति (ठञ्) ॥

वृत्तिः ॥ योजनशब्दाद् द्वितीयासमर्थाद् गच्छतीत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति ॥

वार्त्तिकम् ॥ क्रोशशतयोजनशतयोरुपसंख्यानम् ॥

वा० ॥ ततो ऽभिगमनमर्हतीति च क्रोशशतयोजनशतयोरुपसंख्यानम् ॥

74. The affix ṭhañ comes in the sense of 'who goes', after the word yojana in the accusative construction.

Thus योजनं गच्छति = यौजनिकः ॥

Vârt:—So also after the words क्रोशशत and योजनशत. As क्रौशशतिकः, यौजनशतिकः ॥

Vârt:—The affix after these two words means also "who is worthy to be approached from so far". As क्रोशशतादभिगमनमर्हति = क्रौशशतिको भिक्षुः, यौजनशतिक आचार्यः ॥

पथः ष्कन् ॥ ७५ ॥ पदानि ॥ पथः- ष्कन् ॥

वृत्तिः ॥ पथिन्शब्दाद् द्वितीयासमर्थाद् गच्छतीत्यस्मिन्नर्थे ष्कन्प्रत्ययो भवति ॥

75. The affix shkan (/—क) comes in the same sense of 'who goes there', after the word patha, being in the 2nd case in construction.

Of the affix ष्कन्, ष् is for ङीष् (IV. 1. 41), and न् for accent (VI. 1. 197). As पन्थानं गच्छति = पथिकः fem. पथिकी ॥

पन्थो ण नित्यम् ॥ ७६ ॥ पदानि ॥ पन्थो, ण, नित्यम् ॥

वृत्तिः ॥ नित्यग्रहणं प्रत्ययार्थविशेषणम्। पथः पन्थ इत्ययमादेशो भवति णश्च प्रत्ययो नित्यं गच्छतीत्यस्मिन्विषये ॥

76. The affix ṇa (± अ) comes after the word pantha, which becomes the substitute of pathin, the sense of the affix being "who always goes".

The word नित्य qualifies the sense of the affix. Thus पन्थानं नित्यं गच्छति = पान्थः as पान्थो भिक्षां याचते ॥ Why नित्यं ? See पथिकः ॥

उत्तरपथेनाहृतं च ॥ ७७ ॥ पदानि ॥ उत्तरपथेन-आहृतम्-च (ठञ्) ॥

वृत्तिः ॥ निर्देशादेव समर्थविभक्तिः । उत्तरपथशब्दात्तृतीयासमर्थादाहृतमित्येतस्मिन्विषये ठञ् प्रत्ययो भवति ॥

वार्त्तिकम् ॥ आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वपदादुपसंख्यानम् ॥

वा० ॥ अजपथशङ्कुपथाभ्यां चोपसंख्यानम् ॥ वा० ॥ मधुकमरिचयोरण् स्थलात् ॥

77. The affix ठञ् comes, after the word 'uttarāpatha' in the third case in construction, in the sense of 'who passes by that way' and 'what is conveyed by that way'.

The construction of the sûtra shows that the base must be in the 3rd case. The word च shows that the word गच्छति 'who passes by that way' should also be read into the aphorism. Thus उत्तरपथेनाहृतं = औत्तरपथिकम् or उत्तरपथेन गच्छति = औत्तरपथिकः ॥

Vârt :—So also after the word पथ preceded by the words वारि, जङ्गल, स्थल, कान्तार the affix has the sense of 'conveyed by that way' or 'passing by that way'. As वारिपथेनाहृतः = वारिपथिकम्, वारिपथेन गच्छति = वारिपथिकः, so also जाङ्गलपथिक, स्थालपथिक, कान्तारपथिक, masculine or neuter according as the affix means conveyed or passing.

Vârt :—So also after the words अजपथ and शंकुपथ as, अजपथेनाहृतं गच्छति वा = आजपथिकः, शांकुपथिकः ॥

Vârt :—The affix अण् comes after the word स्थलपथ when the thing conveyed or brought means honey' or 'pepper'. As स्थालपथं मधुकं, स्थालपथं मरिचम् ॥

कालात् ॥ ७८ ॥ पदानि ॥ कालात् (ठञ्) ॥

वृत्तिः ॥ कालादित्यधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामः कालादित्येवं तद्वेदितव्यम् ॥

78. In the following sûtras, the phrase "after a word denoting time", should be supplied to complete the sense.

The word कालात् bears rule in the following aphorisms upto V. I. 96 inclusive. Thus the next sûtra तेन निर्वृत्तम् means 'accomplished by means thereof'. We must read the word काल into it. As मासेन निर्वृत्तम् = मासिकम् &c.

तेन निर्वृत्तम् ॥ ७९ ॥ पदानि ॥ तेन-निर्वृत्तम् ॥

वृत्तिः ॥ तेनेति तृतीयासमर्थात्कालवाचिनः प्रातिपदिकान्निर्वृत्तमित्यस्मिन्नर्थे ठञ् प्रत्ययो भवति ॥

79. The affix ṭhan (±/–इक) comes after a word denoting time, being in the third case in construction, in the sense of "to be accomplished by that time".

Thus अह्ना निर्वृत्तं = आह्निकम् "to be accomplished in a day" i. e. a certain portion of reading &c, आर्धमासिकम्, सांवत्सरिकम् ॥

तमधीष्टो भृतो भूतो भावी ॥ ८० ॥ पदानि ॥ तमधीष्टो, भृतः, भूतः, भावी ॥

वृत्तिः ॥ तमिति द्वितीयासमर्थात्कालवाचिनः प्रातिपदिकादधीष्टो भृतो भूतो वा भावीत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति ॥

80. The above-affixes come after a word expressing time, in the accusative case in construction, in the senses of "solicited to instruct for such a period, hired for such a period, which had lasted for such a period, or which will last so long".

The word अधीष्टः means "honorary office", therefore 'one solicited to teach, but who accepts no pay' III. 3. 161, भृतः means "engaged on wages", भूतः means 'the time pervaded or occupied by its existence', and भावी the same as last in the future. The word denoting time will be in the second case. by II. 3. 5. Thus मासमधीष्टः = मासिकोऽध्यापकः, so also मासंभृतः = मासिकः कर्मकरः, मासंभूतः = मासिको व्याधिः, मासंभावी = मासिक उत्सवः ॥

Q. The solicitation (अध्येषण) and hiring (भरण) only take a short time, how can these acts extend over a month?

A. It is not these acts, but their results which extend over a month, such as, teaching and serving.

मासाद्वयसि यत्खञौ ॥ ८१ ॥ पदानि ॥ मासाद्, वयसि, यत्-खञौ ॥

वृत्तिः ॥ मासशब्दाद्वयस्यभिधेये यत्खञौ प्रत्ययौ भवतः । ठञोऽपवादौ ॥

81. The affixes yat (∠–य) and khañ (±/ईन) come after the word mâsa, in denoting 'age'.

This debars ठञ् ॥ The word भूतः of the previous sûtra should be read into this. Thus मासंभूतः = मास्यः or मासीनः 'a month old'.

Why do we say when denoting 'age'? Observe मासिकः ॥

द्विगोर्यप् ॥ ८२ ॥ पदानि ॥ द्विगोः, यप् ॥

वृत्तिः ॥ मासाद्वयसीति वर्त्तते । मासान्ताद् द्विगोर्यप् प्रत्ययो भवति वयस्यभिधेये ।

82. The affix yap (य) comes after the word mâsa when forming a Dvigu compound; and meaning 'age'.

Thus द्वौ मासौ भृतः = द्विमास्यः, त्रिमास्यः ॥

षण्मासाण्ण्यच्च ॥ ८३ ॥ पदानि ॥ षण्मासात्, ण्यत्-च ॥

वृत्तिः ॥ वयसीत्येव । षण्मासशब्दाद्वयस्यभिधेये ण्यत् प्रत्ययो भवति, यप् च ॥

83. After the word shaṇmâsa, come the affixes ṇyat (ण्—यं) as well as यप् and ठञ्, in the sense of 'age'.

Thus षाण्मास्यः, षण्मास्यः, and षाण्मासिकः ॥

अवयसि ठंश्च ॥ ८४ ॥ पदानि ॥ अवयसि, ठन्, च ॥

वृत्तिः ॥ षण्मासशब्दादवयस्यभिधेये ठन् प्रत्ययो भवति ॥

84. The affix ṭhan (ठ्—इक) comes also after the word shaṇmâsa, when 'age' is not meant.

The च draws in the affix ण्यत् also. Thus षण्मासिकः or षाण्मास्यो रोगः 'a disease lasting six months'.

समायाः खः ॥ ८५ ॥ पदानि ॥ समायाः, खः ॥

वृत्तिः ॥ अधीष्टादयश्चत्वारो ऽर्था अनुवर्त्तन्ते । समाशब्दाद् द्वितीयासमर्थाद् अधीष्टादिष्वर्थेषु खः प्रत्ययो भवति । ठञोपवादः ॥

85. The affix kha (ईन) comes in the fourfold senses of solicited, hired, lasted, and will last, after the word samâ.

This debars ठञ् ॥ Thus समामधीष्टो, भृतो भूतो भावी वा = समीनः ॥ Some say, the sense of the affix is तेन निर्वृत्तं V. I. 79, as समया निर्वृत्तः = समीनः ॥

द्विगोर्वा ॥ ८६ ॥ पदानि ॥ द्विगोः-वा (खः) ॥

वृत्तिः ॥ समायाः ख इत्येव । समाशब्दान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु पञ्चसु वा खः प्रत्ययो भवति ॥

86. The affix kha comes optionally in the senses taught in V. 1. 76, 80, after the word Samâ, forming a Dvigu.

In the alternative ठञ् will also apply. The Vârtika taught in V. I. 20 (प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणं मलुकि) applies here also. Thus द्विमासीनः or द्वैमासिकः, त्रिमासीनः or त्रैमासिकः ॥

रात्र्यहस्संवत्सराच्च ॥ ८७ ॥ पदानि ॥ रात्रि-अहः-संवत्सरात्, च (खः) ॥

वृत्तिः ॥ रात्रि अहः संवत्सर इत्येवमन्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति । खेन मुक्ते पक्षे ठञपि भवति ॥

87. The affix kha optionally comes in the fivefold senses (V. 1. 79, 82), after the words râtri, ahan, and samvatsara, occasioning a Dvigu.

In the alternative ठञ् will also come. Thus द्विरात्रीणः, द्वैरात्रिकः, द्व्यहीनः VI. 4. 145 or द्वैयह्निकः, द्विसंवत्सरीणः, द्विसांवत्सरिकः VII. 3. 15.

वर्षाल्लुक् च ॥ ८८ ॥ पदानि ॥ वर्षात्, लुक्, च ॥

वृत्तिः ॥ द्विगोरित्येव । वर्षान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति । पक्षे ठञ् । तयोश्च वा लुग्भवति ॥

88. The above affixes kha and ṭhañ may also be elided after a Dvigu ending in varshâ.

The affix ख as well as ठञ् come in the five fold senses V. 1. 79, 80, after the word वर्षा forming a Dvigu; and these two affixes may also be elided optionally. Thus we have three forms; द्विवर्षीणो, द्विवार्षिको or द्विवर्षो व्याधिः 'a disease that lasted two years'. Compare VII. 3. 16; but when the sense is that of भावी, the form will be द्वैवर्षिकः ॥

चित्तवति नित्यम् ॥ ८९ ॥ पदानि ॥ चित्तवति-नित्यम् (लुक्) ॥

वृत्तिः ॥ चित्तवति प्रत्ययार्थे ऽभिधेये वर्षशब्दान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषूत्पन्नस्य प्रत्ययस्य नित्यं लुग्भवति॥

89. The affixes meaning accomplished &c V. 1. 79, 80, are necessarily elided after the word varshâ forming a Dvigu, when it refers to a being endowed with reason.

Here the elision is compulsary and not optional as in the last. Thus द्विवर्षो दारकः 'a boy two years old'. Why do we say चित्तवति "when meaning endowed with reason"? Observe द्विवर्षीणो व्याधिः ॥

षष्टिकाः षष्टिरात्रेण पच्यन्ते ॥ ९० ॥ पदानि ॥ षष्टिकाः, षष्टिरात्रेण, पच्यन्ते ॥

वृत्तिः ॥ षष्टिकशब्दो निपात्यते. बहुवचनमतन्त्रम् । षष्टिरात्रशब्दात्तृतीयासमर्थात्कन् प्रत्ययो निपात्यते पच्यन्तइत्येतस्मिन्नर्थे, रात्रिशब्दस्य च लोपः ॥

90. The anomalously formed word shashṭikâḥ has the meaning of "what are matured in six nights".

The word षष्टिकाः may be said to be formed by adding कन् to षष्टिरात्रि in the 3rd case in construction, then eliding the word रात्रि, the force of the affix being 'matured'. Thus षष्टिरात्रेण पच्यन्ते = षष्टिकाः 'a kind of barley'. It is a name of barley and therefore does not apply to pulse, beans &c, though they may also ripen in six days.

वत्सरान्ताच्छश्छन्दसि ॥ ९१ ॥ पदानि ॥ वत्सरान्तात्, छः, छन्दसि ॥

वृत्तिः ॥ वत्सरान्तात्प्रातिपदिकान्निर्वृत्तादिष्वर्थेषु छन्दसि विषये छः प्रत्ययो भवति । ठञोपवादः ॥

91. The affix chha (ईय) comes in the Chhandas, in the fivefold senses taught in V. 1. 79, 80, after a stem ending with vatsara.

This debars ठञ् ॥ Thus इद्वत्सरीयः, इदावत्सरीयः ॥

संपरिपूर्वात्ख च ॥ ९२ ॥ पदानि ॥ संपरिपूर्वात्, ख, च ॥

वृत्तिः ॥ संपरिपूर्वाद्वत्सरान्तात्प्रातिपदिकाच्छन्दसि विषये निर्वृत्तादिष्वर्थेषु खःप्रत्ययो भवति, चकाराच्छश्च ॥

92. The affixes ख (ईन) and छ (ईय) come in the Chhandas in the fivefold senses taught in V. 1. 79, 80, after the word vatsara, when preceded by sam and pari.

Thus संवत्सरीणः and संवत्सरीयः, परिवत्सरीणः and परिवत्सरीयः ॥

तेन परिजय्यलभ्यकार्यसुकरम् ॥ ९३ ॥ पदानि ॥ तेन-परिजय्य, लभ्य, कार्य, सुकरम्-(ठञ्) ॥

वृत्तिः ॥ तेनेति तृतीयासमर्थात्कालवाचिनः प्रातिपदिकात्परिजय्य लभ्य कार्य्य सुकर इत्येतेष्वर्थेषु ठञ् प्रत्ययो भवति ॥

93. The affix ṭhañ (±/—इक or क) comes after a word denoting time, in the 3rd case in construction, in the sense of "to be subdued, to be gained or attained, to be completed and to be easily completed in that time".

Thus मासेन परिजय्यः (शक्यते जेतुं) = मासिको व्याधिः, सांवत्सरिको व्याधिः, मासेन लभ्यः = मासिकः पटः, मासेन कार्यं = मासिकं चान्द्रायणं, मासेन सुकरो = मासिकः प्रासादः ॥

तदस्य ब्रह्मचर्यम् (ठञ्) ॥ ९४ ॥ पदानि ॥ तत्-अस्य, ब्रह्मचर्य्यम् ॥

वृत्तिः ॥ तदिति प्रथमा समर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत्तदस्येति निर्दिष्टं ब्रह्मचर्यं चेद्भवति ॥ तदिति द्वितीयासमर्थात्कालवाचिनः प्रातिपदिकादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति ब्रह्मचर्य्यं चेद्गम्यते ॥

वार्त्तिकम् । महानाम्न्यादिभ्यः षष्ठीसमर्थेभ्य उपसंख्यानम् ॥ वा० ॥ तच्चरतीति च ॥

वा० ॥ अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः ॥ वा० ॥ अष्टाचत्वारिंशतो ड्वुंश्च डिनिश्च वक्तव्यः ॥

वा० ॥ चातुर्मास्यानां यलोपश्च ड्वुंश्च डिनिश्च वक्तव्यः ॥ वा० ॥ चतुर्मासाण् ण्यो यज्ञे ॥

वा० ॥ संज्ञायामण्वक्तव्यः ॥

94. The affix ṭhañ comes after a word of time in the sense of "an abstinence that lasts so long" or "who practises abstinence so long".

The word तद् shows that the word must be in the accusative case : अस्य shows the force of the affix, ब्रह्मचर्य्यः joins both. Thus मासं ब्रह्मचर्य्यमस्य = मासिको ब्रह्मचारी "who practises abstinence for a month". So also आर्धमासिकः, सांवत्सरिकः ॥

Another explanation is, the affix ṭhañ comes after a word in the *first* case in construction, when the sense is that of an abstinence which lasts for such a period. As मासोऽस्य ब्रह्मचर्यस्य = मासिकं ब्रह्मचर्यम् "an abstinence lasting for a month". आर्धमासिकं, सांवत्सरिकं ॥

In the first case the affix relates to a person, in the second, to the vow itself. Both these explanations are valid, as the structure of the aphorism is open to both constructions.

Vârt :—So also after the words महानाम्नी &c in the genitive construction. As महानामिकम्, गैदानिकम्, आदित्य व्रतिकम् ॥

Vârt :—After those words, the affix means also 'who practises that'. As महानाम्नीश्चरति = माहानामिकः, आदित्यव्रतिकः, गौदानिकः ॥ महानाम्नी + ठञ् = महानामन् + ठञ् (VI. 3. 35 Vârt) = माहानामिकः (VI. 4. 144). महनाम्न्य ऋचः, तत् सहचरितं व्रतं ॥

Vârt :—The affix डिनि comes after the words अवान्तरदीक्षा &c, in the sense of 'who practices'. As अवान्तरदीक्षांचरति = अवान्तरदीक्षी, तिलव्रतिन् ॥

Vârt :— The affixes ड्वुन् and डिनि come after the word अष्टचत्वारिंशत्, as अष्टचत्वारिंशद्वर्षाणि व्रतंचरति = अष्टचत्वारिंशकः or अष्टचत्वारिंशिन् ॥

Vârt :—The same affixes come after the words चतुर्मास्य &c, the final य being elided. As चतुर्मास्यानि चरति = चातुर्मासकः or चातुर्मासिन् ॥

Vârt :—The affix ण्य comes after चतुर्मास, in the sense of 'produced there'. As चतुर्षु मासेषु भवानि = चातुर्मास्यानि ॥ It refers to a sacrifice.

Vârt :—The affix अण् comes, when it is a Name, as, चतुर्षु मासेषु भवा = चातुर्मासी पौर्णमासी ॥ So also आषाढी, कार्त्तिकी, फाल्गुनी ॥

तस्य च दक्षिणा यज्ञाख्येभ्यः ॥ ९५ ॥ पदानि ॥ तस्य, च, दक्षिणा, यज्ञाख्येभ्यः (ठञ्)

वृत्तिः । तस्येति षष्ठीसमर्थेभ्यो यज्ञाख्येभ्यो दक्षिणेत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति ।

95. The affix ṭhañ, comes after a word being the name of a sacrifice, in the sense of "the fee thereof".

As अग्निष्टोमस्य दक्षिणा = आग्निष्टोमिकी, वाजपेयिकी, राजसूयिकी ॥

The word आख्या in the sûtra implies that the affix comes even after those sacrifice-denoting words which do not express time (V. 1. 78); had it not been used, the sûtra would have applied only to such sacrifice-denoting words as एकाहः, द्वादशाह, which are time-denoting words as well. The Vartika in V. 1. 20 would apply to द्वादशाह &c. Some texts do not read च in the sûtra.

तत्र च दीयते कार्यं भववत् ॥ ९६ ॥ पदानि ॥ तत्र, च, दीयते, कार्य्यं, भववत् (ठञ्) ॥

वृत्तिः ॥ तत्रेति सप्तमीसमर्थात्कालवाचिनः प्रातिपदिकाद्दीयते कार्यमित्येतयोरर्थयोर्भववत्प्रत्ययो भवति ।

96. The affixes having the sense of भव (IV. 3. 53, IV. 3. 11) come after a time-denoting word, in the sense of "what is given in that, and what is done in that".

As मासे भवम् = मासिकं (IV. 3. 11). This word also means मासे दीयते and मासे कार्यं ॥ Similarly सांवत्सरिकं, प्रावृषेण्यं (IV. 3. 17), वासन्तिकम् (IV. 3. 20), वासन्तम् (IV. 3. 16), हैमनम् (IV. 3. 22), हैमन्तम् (IV. 3. 16), हैमन्तिकम् (IV. 3. 21), शारदम् (IV. 3. 16). All these words mean also what is given or done in those seasons. The word वत् in भववत् means that all the rules of तत्रभवः (IV. 3. 53) apply here.

This sûtra should be divided into two parts, one joining with the previous sûtra, as तत्र च दीयते, यज्ञाख्येभ्यः, as आग्निष्टोमिकं भक्तं, राजसूयिकम्, वाजपेयिकम् ॥

So far does the word काल V. 1. 78, bear rule. Hereafter general affixes will be taught.

व्युष्टादिभ्यो ऽण् ॥ ९७ ॥ पदानि ॥ व्युष्टादिभ्यः, अण् ॥

वृत्तिः । तत्रेति सप्तमीसमर्थेभ्यो व्युष्टादिभ्यो दीयते कार्यमित्येतयोरण् प्रत्ययो भवति ।
वार्त्तिकम् ॥ अण्प्रकरणे ऽग्निपदादिभ्य उपसंख्यानम् ।

97. The affix aṇ (±—अ) comes after the words व्युष्ट &c in the 7th case in construction, the sense of "being given therein or done therein".

Thus व्युष्टे दीयते कार्यं वा = वैयुष्टम्, नैत्यम ॥

Vârt:—So also after the words अग्निपद &c. As, आग्निपदम्, पैलमूलम् ॥ This Vârtika can be dispensed with, as the word अग्निपद &c can be included in the व्युष्टादि list of words.

1 व्युष्ट, 2 नित्य, 3 निष्क्रमण, 4 प्रवेशन, 5 उपसंक्रमण, 6 तीर्थ, 7 अस्तरण (आस्तरण), 8 संग्राम, 9 संघात, 10 अग्निपद, 11 पीलुमूल (पीलु, मूल), 12 प्रवास, 13 उपवास, 14 संभ्रम, 15 दीर्घ. ॥

तेन यथाकथाचहस्ताभ्यां णयतौ ॥ ९८ ॥ पदानि ॥ तेन,यथा,कथाच,हस्ताभ्याम्, णयतौ ॥

वृत्तिः । दीयते कार्यमिति वर्त्तते । तेनेति तृतीयासमर्थाभ्यां यथाकथाचहस्तशब्दाभ्यां यथासंख्यं णयतौ प्रत्ययौ भवतः ।

98. The affix ण (±—अ) and यत् come respectively after the words yathâ-kathâ-cha, and hasta, being in the third case in construction, having the sense of what is " given or is done in this way or with this".

The words दीयते and कार्यं apply to both; the rule of यथासंख्यः (I. 3. 10) not applying to it. The word यथाकथाच is an Indeclinable, meaning contempt. Of course this word cannot take any case-affix, it therefore only gives the sense of third case. As यथा कथाच दीयते कार्यं वा = याथाकथाचम्; हस्तेन दीयते कार्यं वा = हस्त्यम् ॥

संपादिनि ॥ ९९ ॥ पदानि ॥ संपादिनि (ठञ्) ॥

वृत्तिः ॥ तेनेत्येव । तृतीयासमर्थात्संपादिन्यभिधेये ठञ् प्रत्ययो भवति ।

99. The affix ṭhañ (±/—इक) comes after a word in the Instrumental case in construction, in the sense of "fitted for that".

The word सपत्तिः means 'suitable, proper, fit'. The word संपादिन् is formed by adding णिनि to संपद्, the force of the affix being that of necessity (III. 3. 170). As कर्णवेष्टकाभ्यां संपादि मुखं = कार्णवेष्टकिकं मुखं 'a face fit for ear-rings'. वास्त्रयुगिकम् शरीरम् i. e. वस्त्रयुगेन विशेषतः शोभते ॥

कर्मवेषाद्यत् ॥ १०० ॥ पदानि ॥ कर्म्म-वेषात्-यत् ॥

वृत्तिः ॥ कर्मवेषशब्दाभ्यां तृतीयासमर्थाभ्यां यत्प्रत्ययो भवति संपादिनीत्येतस्मिन्निषये । ठञोपवादः ॥

100. The affix yat (य) comes in the sense of "being fitted with that", after the words karma and vesha, in the third-case in construction.

This debars ṭhañ. कर्मणा संपद्यते = कर्मण्यं शरारम्, वेषेण संपद्यते = वेष्यो नटः ॥ For accent see VI. 1. 213.

तस्मै प्रभवति संतापादिभ्यः ॥ १०१ ॥ पदानि ॥ तस्मै-प्रभवति, सन्तापादिभ्य (ठञ्) ॥

वृत्तिः ॥ तस्मादिति चतुर्थीसमर्थेभ्यः संतापादिभ्यः प्रभवतीत्यस्मिन्विषये ठञ् प्रत्ययो भवति ।

101. The affix ṭhañ (±/—इक) comes after the word santâpa &c in the dative construction, in the sense of "what is able to effect that".

The word प्रभवति means 'able, capable'. The dative here has the force of अलम् (II. 3. 16). As, संतापाय प्रभवति = सांतापिकः, सान्नाहिकः ॥

1 संताप, 2 संनाह, 3 संग्राम, 4 संयोग, 5 संपराय, 6 संवेशन, 7 संपेष, 8 निष्पेष, 9 सर्ग, 10 निसर्ग, 11 विसर्ग, 12 उपसर्ग, 13 प्रवास, 14 उपवास, 15 संघात, 16 संवेष*, 17 संवास*, 18 संमोदन, 19 सक्तु, 20 मांसौदनाद्विगृहीतादपि, 21 असर्ग. ॥

योगाद्यच्च ॥ १०२ ॥ पदानि ॥ योगात्, यत्, च ॥

वृत्तिः । योगशब्दाद्यत्प्रत्ययो भवति, चकाराद् ठञ्, तस्मै प्रभवतीत्यस्मिन्विषये ।

102. The affix yat (य) is also added in this sense of 'able to effect that', after the word yoga.

Thus योगाय प्रभवति = योग्यः or यौगिकः ॥

कर्मण उकञ् ॥ १०३ ॥ पदानि ॥ कर्म्मणः, उकञ् ॥

वृत्तिः । कर्मशब्दादुकञ् प्रत्ययोभवति तस्य प्रभवतीत्येतस्मिन्नर्थे । ठञो ऽपवादः ।

103. The affix ukañ (±/ उक) comes after the word Karman, in the same sense of 'able to effect that'.

This debars ठञ्. As कर्मणे प्रभवति = कार्मुकं धनुः ॥ This word कार्मुकम् means always a 'bow', and is never employed to designate anything else.

समयस्तदस्य प्राप्तम् ॥ १०४ ॥ पदानि ॥ समयः, तत्, अस्य, प्राप्तम् (ठञ्) ॥

वृत्तिः । समयशब्दात् तदिति प्रथमासमर्थाद् अस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्राप्तं चेद् भवति ॥

104. The affix ṭhañ (±/—इक) comes after the word samaya in the first case in construction, in the sense of "that has arrived for it".

Thus सामयिकं कर्म = 'a work for which the time has come'.

ऋतोरण् ॥ १०५ ॥ पदानि ॥ ऋतोः, अण् ॥

वृत्तिः । तदस्य प्राप्तमित्यनुवर्त्तते । ऋतुशब्दात्तादिति प्रथमा समर्थाद्, अस्येति षष्ठ्यर्थे ऽण् प्रत्ययो भवति, तदस्य प्राप्तमित्येतस्मिन् विषये ।

वार्त्तिकम् । तदस्य प्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् ॥

105. The affix aṇ (±—अ) comes after the word ṛitu, meaning "that has come for it".

As ऋतुःप्राप्तोऽस्य = आर्त्तवं पुष्पम् (Guṇa by VI. 4. 146) "the flower for which the season has arrived".

Vârt:—So also after the words उपवस्त्र &c. As औपवस्त्रम्, प्राशित्रम् ॥

छन्दसि घस् ॥ १०६ ॥ पदानि ॥ छन्दसि, घस् ॥

वृत्तिः ॥ ऋतुशब्दाच्छन्दसि विषये घस् प्रत्ययो भवति तदस्य प्राप्तमित्यस्मिन्विषये । अणोपवादः ।

106. In the Chhandas, the affix ghas (इय) comes after the word ऋतु in the same sense of 'season has come for it'.

This debars अण्. As अयंते योनिर्ऋत्वियः ॥ Here there is no Guṇa by VI. 4. 146, because by sûtra I. 4. 16, ऋतु before the affix घस् gets the designation of पद, hence the guṇa rule which applies to भ (I. 4. 18) does not apply.

कालाद्यत् ॥ १०७ ॥ पदानि ॥ कालात्, यत् ॥

वृत्तिः ॥ कालशब्दाद्यत्प्रत्ययो भवति तदस्य प्राप्तमित्यस्मिन्विषये ।

107. The affix yat (य) comes after the word Kâla, in the same sense of 'time has come for it'.

As काल्यस्तापः, काल्यं शीतं ॥ See VI. 1. 213.

प्रकृष्टे ठञ् ॥ १०८ ॥ पदानि ॥ प्रकृष्टे ठञ् ॥

वृत्तिः ॥ कालादित्येव,तदस्येति च । प्राप्तमिति निवृत्तम् । प्रकर्षेण कालो विशेष्यते प्रकर्षे वर्तमानात्कालात्प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति ।

108. The affix ṭhañ (±/—इक) comes after the word Kâla in the first case in construction, in the sense of "long-standing".

As प्रकृष्टो कालोऽस्य = कालिकमृणम् "long-standing debt". कालिकम् वैरम् "long-standing enmity".

In this sûtra काल and तदस्य are understood, but not so the word प्राप्तम् ॥

प्रयोजनम् ॥ १०९ ॥ पदानि ॥ प्रयोजनम् (ठञ्) ॥

वृत्तिः ॥ तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं प्रयोजनं चेत्तद्भवति ॥

109. The affix ṭhañ (±/—इक) comes after a word in the first case in construction in the sense of "that whose occasion or purpose is this".

As इन्द्रमहः प्रयोजनमस्य = ऐन्द्रमहिकम्, गाङ्गामहिकम् ॥

विशाखाषाढादण्मन्थदण्डयोः ॥ ११० ॥ पदानि ॥ विशाखा-अषाढात्, अण्, मन्थ-दण्डयोः ॥

वृत्तिः ॥ विशाखाषाढाशब्दाभ्यामण् प्रत्ययो भवति तदस्य प्रयोजनमित्येतस्मिन्निषये यथासंख्यं मन्थदण्डयोरभिधेययोः ।

वार्त्तिकम् । चूडादिभ्य उपसंख्यानम् ॥

110. The affix aṇ (±—अ) comes in the sense of 'that whose purpose is this', after the words viśâkhâ, and ashâḍhâ, when the derivative of the first is combined with मन्थ and that of the second with दण्ड ॥

As वैशाखो मन्थः, आषाढो दण्डः ॥

Vârt:—So also after the words चूडा &c. As चूडा प्रयोजनमस्य = चौडम्, श्रद्धा प्रयोजनमस्य = श्राद्धम् ॥

अनुप्रवचनादिभ्यश्छः ॥ १११ ॥ पदानि ॥ अनुप्रवचनादिभ्यः, छः ॥

वृत्तिः ॥ अनुप्रवचनादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययो भवति तदस्य प्रयोजनमित्यस्मिन्विषये । ठञोपवादः ।

वार्त्तिकम् ॥ विशिपूरिपतिरुहिप्रकृतेरनात्सपूर्वपदादुपसंख्यानम् ॥ वा० ॥ स्वर्गादिभ्यो यत्वक्तव्यः ॥

वा० ॥ पुण्याहवाचनादिभ्यो लुग्वक्तव्यः ॥

111. The affix Chha (ईय) comes in the same sense of 'that whose purpose is this', after the words अनुप्रवचन &c.

This debars ठञ् ॥ Thus अनुप्रवचनं प्रयोजनमस्य = अनुप्रवचनीयम्, उत्थापनीयम् ॥

Vârt:—So also after the derivatives formed by the affix अन (यु) from the radicals विश्, 'to enter', पूर्, 'to fill', पत् 'to fall', and रुह् 'to mount', when preceded by a word. As गृहप्रवेशनीयम्, प्रपापूरणीयम्, अश्वप्रपतनीयम्, प्रासादारोहणीयम् ॥

Vârt:—The affix यत् comes after the words स्वर्ग &c. स्वर्गं प्रयोजनमस्य = स्वर्ग्यम्, यशस्यम्, आयुष्यम्, काम्यम्, धन्यम् ॥

Vârt:—The affix is elided after the words पुण्याहवाचन &c. As, पुण्याहवाचनं प्रयोजनमस्य = पुण्याहवाचनं, स्वस्तिवाचनं, शान्तिवाचनम् ॥

1 अनुप्रवचन, 2 उत्थापन, 3 उपस्थापन, 4 संवेशन, 5 प्रवेशन, 6 अनुप्रवेशन, 7 अनुवासन, 8 अनुवचन, 9 अनुवाचन, 10 अन्वारोहण, 11 प्रारम्भण, 12 आरम्भण, 13 आरोहण, 14 अनुवेशन, 15 अनुवादन, 16 प्ररोहण ॥

समापनात्सपूर्वपदात् ॥ ११२ ॥ पदानि ॥ समापनात्, सपूर्वपदात् (छः) ॥

वृत्तिः ॥ समापनशब्दात्पूर्वपदाद्विद्यमानपूर्वपदाच्छः प्रत्ययो भवति तदस्य प्रयोजनमित्येतस्मिन्विषये । ठञोपवादः ।

112. The affix Chha comes in the same sense of "that whose purpose is this", after the word samâpana, when it has a word in composition preceding it.

This debars ठञ् ॥ Thus छन्दः समापनं प्रयोजनमस्य = छन्दः समापनीयम्, व्याकरण समापनीयम् ॥ The specific mention of the word पद in the aphorism indicates that the rule will not apply when a word other than a 'pada,' such as the affix 'bahuch,' V. 3. 68. precedes the word Samâpana.

ऐकागारिकट् चौरे ॥ ११३ ॥ पदानि ॥ ऐकागारिकट्, चौरे ॥

वृत्तिः ॥ ऐकागारिकट् इति निपात्यते चौरेभिधेये ।

113. The word ऐकागारिकट् is irregularly formed, in the sense of a 'thief'.

The feminine will be in ङीप्. Thus एकागारं प्रयोजनमस्य = ऐकागारिकः fem. ° की ॥ This word can be regularly formed by ठञ्, but it will always be restricted to mean a thief. When any other thing is designated, it will not take this affix. Thus एकागारं प्रयोजनमस्य भिक्षाः, here there will be no affixing. The feminine moreover will be in ङीप् ॥ Some say the word is formed by adding the affix इकट् with the irregular Vṛiddhi of the first syllable.

आकालिकडाद्यन्तवचने ॥ ११४ ॥ पदानि ॥ आकालिक ट्, आद्यन्तवचने ॥

वृत्तिः ॥ आकालिकट् इति निपात्यते आद्यन्तवचने । समानकालशब्दस्याकालशब्द आदेशः । आद्यन्तयोश्चैतद्विशेषणम् । इकट् प्रत्ययश्च निपात्यते ।

वार्त्तिकम् । आकालाद् ठंश्च ॥

114. The word âkâlikaṭ is irregularly formed in the sense of "what coincides with the beginning and the end i. e. what lasts only an instant".

The word आकाल is substituted for समानकाल. Thus आकालिकः स्तनयित्नुः 'a thunder lasting for an instant'. आकालिकी विद्युत् "a lightening lasting a twinkle". i. e. whose death is equal to its time of birth or dying as soon as born.

Vârt:—The affixes ठन् and ठञ् also come after आकाल; as आकालिका विद्युत् ॥

So far is the governing power of the affix ठञ् V. 1. 18.

तेन तुल्यं क्रिया चेद्वतिः ॥ ११५ ॥ पदानि ॥ तेन, तुल्यं-क्रिया-चेत् वतिः ॥

वृत्तिः ॥ तेनेति तृतीयासमर्थात्तुल्यमित्यर्थे वतिः प्रत्ययो भवति यत्तुल्यं क्रिया चेत्सा भवति ॥

115. The affix vati (वत्) comes after a word in the third case in construction, in the sense of "like that", when the meaning is 'similarity of action'.

As ब्राह्मणेन तुल्यं वर्तते = ब्राह्मणवत्, राजवत् ॥

Why do we say "action"? The affix will not be joined when the similarity is in 'quality'. As पुत्रेणसह स्थूलः "as big as the son", पुत्रेण तुल्यः पिङ्गलः ॥

तत्र तस्येव ॥ ११६ ॥ पदानि ॥ तत्र,तस्य,इव (वतिः) ॥

वृत्तिः ॥ तत्रेति सप्तमीसमर्थात्तस्येति षष्ठीसमर्थाच्च इवार्थे वतिः प्रत्ययो भवति ॥

116. The affix vati comes also in the sense of "like what is therein or thereof".

As मथुरायामिव = मथुरावत् 'like that in Mathura'. as मथुरावत् स्रुघ्ने प्राकारः, पाटलिपुत्रवत् साकेते परिखा; देवदत्तस्येव देवदत्तवद् यज्ञदत्तस्य गावः &c.

तदर्हम् ॥ ११७ ॥ पदानि ॥ तद्-अर्हम् (वतिः) ॥

वृत्तिः ॥ तदिति द्वितीयासमर्थादर्हमित्येतस्मिन्नर्थे वतिः प्रत्ययो भवति ॥

117. The affix vati comes after a word in the second case in construction, in the sense of "befitting that or suited to that".

As राजानमर्हति = राजवत् पालनम् "the protection as befits a king i.e. as a king should protect". ब्राह्मणवत्, ऋषिवत्, क्षत्रियवत् ॥

उपसर्गाच्छन्दसि धात्वर्थे ॥ ११८ ॥ पदानि ॥ उपसर्गात्-छन्दसि-धात्वर्थे(वति) ॥

वृत्तिः ॥ उपसर्गात्साधने धात्वर्थे वर्त्तमानात्स्वार्थे वतिः प्रत्ययो भवति छन्दसि विषये ॥

118. In the Chhandas, the affix vati is added to an Upasarga (Preposition), in the sense of a verbal root.

As the word उद्वतः and निवतः in the following Rik (X. 142. 4).

यदुद्वतो निवतो यासि बप्सत् पृथगेषि प्रगर्धिनीव सेना ॥ "When thou O Fire ! goest burning high (उद्वतः = उद्गतान्) and low (निवतः = निगतान्) trees &c.

तस्य भावस्त्वतलौ ॥ ११९ ॥ पदानि ॥ तस्य-भावः- त्वतलौ ॥

वृत्तिः ॥ तस्येति षष्ठीसमर्थाद् भाव इत्येतस्मिन्नर्थे त्वतलौ प्रत्ययौ भवतः ॥

119. The affixes tva (त्व) and tal (— —' त or ता) come after a word in the sixth case in construction, in the sense of "the nature thereof".

As अश्वस्य भावः = अश्वत्वम् or अश्वता, गोत्वम or गोता ॥

आ च त्वात् ॥ १२० ॥ पदानि ॥ आ-च-त्वात् (त्व-तलौ) ॥

वृत्तिः ॥ ब्रह्मणस्त्व इति वक्ष्यति । आ एतस्मात्त्वशब्दात् यानित ऊर्ध्वमनुक्रमिष्याम, स्तत्र त्वतलौ प्रत्ययावधिकृतौ वेदितव्यौ ॥

120. From this forward as far as the aphorism V. 1. 136, the affixes त्व and तल् bear rule.

Thus in V. 1. 122, त्व and तल् are read, giving the forms पृथुत्वम् and पृथुता &c. This rule is intended to secure admission for these two affixes notwithstanding the bars in the shape of subsequent aphorisms directing the employment of other affixes. These affixes signify, in addition to भाव (nature), कर्म (action) also, in V. 1. 124. The word च in the aphorism is intended to secure their admission notwithstanding the affixes नञ् and स्नञ् (VI. 1. 87). Thus स्त्रियाः भावः = स्त्रैणम्, स्त्रीत्वम्, स्त्रीता 'the nature of a female'. पुंस्त्वम्, पुंस्ता, पौंस्नम् ॥

न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटबुधकतरसलसेभ्यः ॥ १२१ ॥ पदानि ॥ ननञ्पूर्वात्, तत्पुरुषात्, अचतुर-संगत-लवण-वट-बुध-कत-रस-लसेभ्यः ॥

वृत्तिः ॥ इत उत्तरे ये भावप्रत्ययास्ते नञ्पूर्वात्तत्पुरुषान्न भवति चतुरादीन्वर्जयित्वा ॥

121. The affixes denoting 'nature', taught hereafter, do not come after a Tatpurusha compound formed by the negative particle नञ्, with the exception of the following:—chatura, saṅgata, lavaṇa, vaṭa, budha, kata, rasa, and lasa.

Thus the words अपति, अपटु and अरमणीय will have two forms only i. e. अपतित्वम् or अपतिता, अपटुत्वम् or अपटुता, अरमणीयत्वम् or अरमणीयता ॥ While by V. 1. 128, other compounds will have यक् also, as सैनापत्यम् ॥ An exception to this is आविद्वद्र्य (VII. 2. 25), as used by the author himself. Why do we say नञ् पूर्वात् "a Tatpurusha whose first member is नञ्"? Observe बार्हस्पत्यम्, प्राजापत्यम् ॥

Why do we say 'after a Tatpurusha?' Observe, when the word अपटु is a Bahuvrihi compound meaning नास्य पटवः सन्ति, its derivative will be आपटवम्. So also, आलाघवम् ॥

So also the compounds of चतुर &c, with नञ्, e. g. आचतुर्यम्, आसंगत्यम्, आलवण्यम्, आवट्यम्, आबुध्यम्, आकत्यम्, आरस्यम्, आलस्यम् ॥ In some texts, there is शुध instead of बुध ॥

पृथ्वादिभ्य इमनिज्वा ॥ १२२ ॥ पदानि ॥ पृथ्वादिभ्यः, इमनिच, वा ॥

वृत्तिः ॥ पृथु इत्येवमादिभ्यः प्रातिपदिकेभ्य इमनिच्प्रत्ययो भवति वा, तस्य भाव इत्येतस्मिन्नर्थे ॥

122. The affix imanich (इमॅन्) comes optionally in the sense of 'nature thereof', after the words prithu &c.

The word वा 'optionally' is employed with the intention of securing admission for the affixes अण् &c. Thus पृथोर्भावः = प्रथिमन् nom. प्रथिमा (पृथु + इमन् = पृथ् + इमन् VI. 4. 155 = प्रथ् + इमन् VI. 4. 161 = प्रथिमा), or पार्थवम् by V. 1. 131. So also म्रदिमा or मार्दवम् ॥ The उ of पृथु and मृदु is elided by VI. 4. 155, and र is substituted for ऋ by VI. 4. 161. Of course, the affixes त्व and तल् come here also as, पृथुत्वम्, मृदुत्वम्, पृथुता, मृदुता ॥

1 पृथु, 2 मृदु, 3 महत्, 4 पटु, 5 तनु, 6 लघु, 7 बहु, 8 साधु, 9 आशु (आसु !), 10 उरु (ऊरु), 11 गुरु, 12 बहुल, 13 खण्ड, 14 दण्ड, 15 चण्ड, 16 अकिंचन, 17 बाल*, 18 होड, 19 पाक, 20 वत्स, 21 मन्द, 22 स्वादु, 23 ह्रस्व, 24 दीर्घ, 25 प्रिय, 26 वृष, 27 ऋजु, 28 क्षिप्र, 2 क्षुद्र, 30 अणु*, 31 वेणु (!).

वर्णदृढादिभ्यः ष्यञ् च ॥ १२३ ॥ पदानि ॥ वर्ण-दृढादिभ्यः, ष्यञ् च ॥

वृत्तिः ॥ वर्णविशेषवाचिभ्यः प्रातिपदिकेभ्यो दृढादिभ्यश्च ष्यञ् प्रत्ययो भवति, चकारादिमनिच्च, तस्य भाव इत्येतस्मिन्विषये ॥

123. The affix shyañ (±/—य) also comes, as well as imanich, after a word denoting colour, and after the words dridha &c, in the sense of 'nature thereof'.

Thus शुक्लस्य भावः = शौक्ल्यम्, शुक्लिमन्, शुक्लत्व, शुक्लता, कार्ष्ण्यम्, कृष्णिमन्, कृष्णत्वम्, कृष्णता; दार्ढ्यम्, द्रढिमन् (nom. °मा), दृढत्वम्, दृढता ॥

The ष् of ष्यञ् shows that the feminine is formed by ङीष् (III. I. 41). As औचित्यः fem. औचित्ती (VI. 4. 148. and 150).

1 दृढ, 2 वृढ*, 3 परिवृढ, 4 भृश, 5 कृश, 6 वक्र (चक्र), 7 शुक्र*, 8 चुक्र*, 9 आम्र 10 कृष्ट, (आकृष्ट), 11 लवण, 12 ताम्र, 13 शीत, 14 उष्ण, 15 जड, 16 बधिर; 17 पण्डित 18 मधुर, 19 मूर्ख, 20 मूक, 21 वेर्यातलातमतिमनःशारदानाम् (लाभ is also read The affix shyañ is added to compounds ending in yâta &c preceded by vi, as, वियातत्वम्, वियातता, वियातिमा, वैयात्यं; विलाभत्वं, विलाभता, विलाभिमा, वैलाभ्यं, विमतित्वं, विमतिता, विमतिमा, वैमत्यं and वैमतं (V. 1. 131); विमनस्त्वं, विमनस्ता, विमनिमा, वैमनस्यं and विशारदत्वं, विशारदता, विशारदिमा, वैशारद्म) ॥ 22 समो, मतिमनसोः, (The words mati and manas preceded by sam take shyañ, as संमतित्वं, संमतिता, &c). 23 जवन. 24 अम्ल, 25 बाल; 26 तरुण, 27 मन्द, 28 स्थिर, 29 बहुल, 30 दीर्घ ॥

गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥ १२४ ॥ पदानि ॥ गुणवचन-ब्राह्मणादिभ्यः, कर्म्मणि, च (ष्यञ्) ॥

वृत्तिः ॥ गुणमुक्तवन्तो गुणवचनाः गुवचनेभ्यो ब्राह्मणादिभ्यश्च तस्येति षष्ठीसमर्थेभ्यः कर्मण्यभिधेये ष्यम् प्रत्ययो भवति । चकाराद् भावे च ।

वार्त्तिकम् ॥ चातुर्वर्ण्यादीनां स्वार्थउपसंख्यानम् ॥

124. The same affix shyan has after a word expressive of quality, and after Brâhmaṇa &c, the sense of the activity or occupation of something or some one.

The च in the aphorism is employed with the intention of including भाव or "nature". The word कर्म denotes activity. जडस्य भावः कर्म वा = जाड्यम् so also ब्राह्मण्यम्, माणव्यम् ॥

The words भाव and कर्म bear rule upto the end of the chapter. This class of ब्राह्मण &c, is âkṛitigaṇa i. e. the fact of a word belonging to which is known only from the forms met with in writers of authority.

Vârt:—The affix does not change the sense in चातुर्वर्ण्य &c, as चत्वार एव वर्णाः = चातुर्वर्ण्यम् ॥ चातुराश्रम्यम्, त्रैलोक्यम्, त्रैस्वर्यम्, षाड्गुण्यम, सैन्यम्, सान्निध्यम्, सामीप्यम्, औपम्यम, सौख्यम् ॥

1 ब्राह्मण, 2 वाडव, 3 माणव, 4 अर्हतो नुम् च, as आर्हन्त्यम् 5 चोर, 6 धूर्त 7 आराधय, 8 विराधय, 9 अपराधय, 10 उपराधय, 11 एकभाव, 12 द्विभाव, 13 त्रिभाव, 14 अन्यभाव, 15 अक्षेत्रज्ञ, 16 संवादिन्, 17 संवेशिन्, 18 संभाषिन्, 19 बहुभाषिन्, 20 शीर्षघातिन् (शीर्षपातिन्), 21 विघातिन्, 22 समस्थ, 23 विषमस्थ, 24 परमस्थ, 25 मध्यमस्थ, 26 अनीश्वर, 27 कुशल, 28 चपल, 29 निपुण, 30 पिशुन, 31 कुतूहल*, 32 क्षेत्रज्ञ, 33 निश्न*, 34 बालिश, 35 अलस, 36 दुष्पुरुष,

37 कापुरुष, 38 राजन्, 39 गणपति, 40 अधिपति, 41 गडुल, 42 दायाद, 43 विशस्ति*, 44 विषम*, 45 विपात*, 36 निपात*, 46 सर्ववेदादिभ्यः स्वार्थे, सार्ववेद्यः = सर्ववेदः ॥ 48 चतुर्वेदस्योभयपदवृद्धिश्च, as चातुर्वैद्यम् 49 शौटीर 50 मूक, 51 कपि, 52 विशसि, 53 पिशाच, 54 विशाल, 55 धनपति, 56 नरपति, 57 निव 58 निधान 59 विष, 60 स्वभाव, 61 निघातिन्, 62 राजपुरुष, 63 विशाय 64 विघात, 65 विजात, 66 नयात, 67 सुहित, 68 दीन, 69 विदग्ध, 70 उचित, 71 समय, 72 शील, 73 तत्पर, 74 इदंपर, 75 यथा तथा, 76 पुरस्, 77 पुनः पुनः, 78 अभाक्ष्ण, 79 तरतम, 80 प्रकाम, 81 यथाकाम, 82 निष्कुल, 83 स्वराज. 84 महाराज, 85 युवराज, 86 सम्राज्, 87 अविदूर, 88 अपिशुन, 89 अनुशंस, 90 अयथा-तथ, 91 अयथापुर, 92 स्वधर्म, 93 अनुकूल, 94 परिमण्डल, 95 विश्वरूप, 96 ऋत्विज्, 97 उदासीन, 98 ईश्वर, 99 प्रतिभू, 100 साक्षि(न्), 101 मानुष, 102 आस्तिक, 103 नास्तिक, 104 युगपद्, 105 पूर्वाधर, 106 उत्तराधर ॥ आकृतिगण ॥

स्तेनाद्यन्नलोपश्च ॥ १२५ ॥ पदानि ॥ स्तेनात्-यत्, नलोपः, च ॥

वृत्तिः ॥ स्तेनशब्दात्षष्ठीसमर्थाद्भावकर्मणोरर्थयोर्यत्प्रत्ययो भवति; नशब्दस्य लोपश्च भवति ॥

125. The affix yat (यं) comes in the sense of "nature thereof or action thereof", after the word stena, in the genitive, and न is elided before this affix.

अनोश्मायस्सरसां जातिसंज्ञयोः ॥ ९४ ॥ पदानि ॥ अनः, अश्म, अयः, सरसाम्, जाति, संज्ञायोः, (टच्) ॥

वृत्तिः ॥ अनस् अश्मन् अयस् सरस इत्येवमन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति जातौ संज्ञायां च विषये ॥

94. The affix ṭach comes after anas, aśman, ayas, and saras, when at the end of a Tatpurusha compound, it denotes a genus or a name.

Thus उपानसम्, अमृताश्मः, कालायसम्, and मण्डूकसरसम् are examples of जाति words, while महानसम्, पिण्डाश्मः, लोहितायसम्, and जलसरसम् are examples of संज्ञा ॥

Why do we say "when meaning a jâti or a sañjñâ ?" Observe सदनः, सदश्माः, सत्सरः ॥

ग्रामकौटाभ्यां च तक्ष्णः ॥ ९५ ॥ पदानि ॥ ग्राम, कौटाभ्याम्, च, तक्ष्णः,(टच्) ॥

वृत्तिः ॥ जातिसंज्ञयोरिति नानुवर्त्तते । ग्रामकौटाभ्यां परो यस्तक्षन्शब्द स्तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति ॥

95. The affix ṭach comes after taksha when preceded by grâm and kauṭa, in a Tatpurusha compound.

The anuvritti of jâti and sañjñâ does not run into this sûtra. Thus ग्रामस्य तक्षा = ग्रामतक्षः, बहूनां साधारणः 'the public carpenter of all'. कुट्यां भवः = कौटः; कौटस्य तक्षा = कौटतक्षः meaning स्वतन्त्रः कर्मजीवी, न कस्यचित्प्रतिबद्धः 'and independent artisan, not particularly bound under engagement to any one'.

अतेः शुनः ॥ ९६ ॥ पदानि ॥ अतेः, शुनः, (टच्) ॥

वृत्तिः ॥ अतिशब्दात्परो यः श्वन्शब्दस्तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति ॥

96. The affix ṭach comes after the word śvan preceded by ati, in a Tatpurusha compound.

Thus अतिक्रान्त श्वानम् = अतिश्वो वराहः "the boar that surpasses the dog" i. e. जववान "very swift". So अतिश्वो सेवकः "the dog-surpassing servant i. e. more devoted to his master than a dog". So also अतिश्वी सेवा "service worse than that of a dog" = अतिनीचासेवा ॥

उपमानादप्राणिषु ॥ ९७ ॥ पदानि ॥ उपमानात्, अप्राणिषु , (टच्) ॥

वृत्तिः ॥ उपमानवाची यः श्वशब्दोऽप्राणिषु वर्त्तते तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति ॥

97. The affix ṭach comes after the word śvan ending in a Tatpurusha compound, when another thing not being a living object is compared with it.

Thus आकर्षः श्वेव = आकर्षश्वः 'a dog-like bow'. फलकश्वः "a dog-like blade". This compounding takes place by II. 1. 56.

Why do we say "when something is likened to it"? Observe न श्वा = अश्वा लोष्टः "a clod of earth which is not a dog". This is not a very happy counter-example of Kâśikâ: for in the case of नञ् Tatpurusha compound

there is express prohibition taught in V. 4. 71. The proper example should be निःश्वालोटः ॥ Why do we say "when the thing compared is not a living being"? Observe वानरः श्वेव=वानरश्वा "a dog-like monkey".

उत्तरमृगपूर्वाच्च सक्थ्नः ॥ ९८ ॥ पदानि ॥ उत्तर, मृग,पूर्वात्, च सक्थ्नः (टच्) ॥

वृत्तिः ॥ उत्तर मृग पूर्व इत्येतेभ्यः परो यः सक्थिशब्दश्चकारादुपमानाच, तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति समासान्तः ॥

98. The affix ṭach comes after sakthi when preceded by uttara, mṛiga, and pûrva in a Tatpurusha compound, as well as when a thing is compared with it.

By the forcee of the word च in the sûtra, we read in the word उपमानात् also. Thus उत्तरसक्थम्, मृगसक्थम्, पूर्वसक्थम् ॥ So also in फलकमिव सक्थि=फलकसक्थम ॥

नावो द्विगोः ॥ ९९ ॥ पदानि ॥ नावः, द्विगोः, (टच्) ॥

वृत्तिः ॥ नौशब्दान्ताद् द्विगोष्टच्प्रत्ययो भवति समासान्तः ॥

99. The affix ṭach comes after the word nau, when at the end of a Dvigu compound.

Thus द्वे नावौ समाहृते=द्विनावम्, so also त्रिनावम् ॥ Thus द्विनावधनम्, पंचनावप्रियः are also formed. So also द्वाभ्यां नौभ्यामागतं=द्विनावरूप्यम्, द्विनावमयम् (IV. 3. 31).

Why do we say 'when in a Dvigu compound'? Observe राजनौः "the king's ship". The phrase अतद्धितलुकि "when a Taddhita affix is not elided" of sûtra V. 4. 92 applies here also. Therefore टच् does not apply in पंचभिर्नौभिः क्रीतः=पंचनौः, दशनौः ॥

अर्द्धाच्च ॥ १०० ॥ पदानि ॥ अर्द्धात्, च, (टच्) ॥

वृत्तिः ॥ अर्द्धशब्दात्परो यो नौशब्दस्तदन्तात्तत्पुरुषाट्टच्प्रत्ययो भवति ॥

100. The affix ṭach comes after the word nau, when preceded by the word ardha, in a Tatpurusha compound.

Thus अर्द्धं नावः=अर्द्धनावम् ॥ The compounding takes place by II. 2. 2. The compound is of neuter gender, and does not take the gender of the term as required by II. 4. 26: for gender is regulated by usage more than any grammatical rules (लोकाश्रयत्वं लिंगस्य) ॥

खार्याः प्राचाम् ॥ १०१ ॥ पदानि ॥ खार्य्याः, प्राचाम्, (टच्) ॥

वृत्तिः ॥ द्विगोरर्द्धाच्चेति द्वयमप्यनुवर्त्तते । खारीशब्दान्ताद् द्विगोरर्द्धाच्च परो यः खारीशब्दस्तदन्तात्तत्पुरुषाट्टच्प्रत्ययो भवति प्राचामाचार्याणां मतेन ॥

101. To the word khârî, at the end of a Dvigu compound, and to the same, when preceded by the word ardha,

in a Tatpurusha compound, the affix ṭach is added, according to the opinion of the Eastern Grammarians.

The words द्विगोः and अर्द्धात् are both understood here. Thus द्वे खार्यौ समाहृते =द्विखारम् or द्विखारि ॥ So also अर्धं खार्याः=अर्धखारम् or अर्धखारी ॥ According to Pâdamanjari this sûtra could be dispensed with: as खार is synonymous with खारी, as द्विखारं, त्रिखारं ॥ And it will be governed by the Vârtika अन्येभ्योऽपि दृश्यते खार शतायर्थम् under V. 1. 57 and 58, in Mahâbhashya.

द्वित्रिभ्यामञ्जलेः ॥ १०२ ॥ पदानि ॥ द्वि, त्रिभ्याम्, अञ्जलेः, (टच्) ॥

वृत्तिः ॥ द्वित्रिभ्यां परो यो ऽञ्जलिशब्दस्तदन्तात्तत्पुरुषाट्टच्प्रत्ययो भवति ॥

102. The affix ṭach is added to the word añjali, when preceded by dvi or tri, in a Dvigu Tatpurusha compound.

Thus द्वावञ्जली समाहृतौ=द्व्यञ्जलम्, so also त्र्यञ्जलम् ॥ The word द्विगोः is understood here also, so that when the compound is not a Dvigu, the rule does not apply. Thus द्वयोरञ्जलिः=द्व्यञ्जलिः ॥ The phrase "when a Taddhita is not elided (V. 4. 92)" is understood here also. Therefore the affix टच् does not apply here : द्वाभ्यामंजलिभ्यां क्रीतः=द्व्यञ्जलिः ॥ So also त्र्यञ्जलिः (V. 1. 28.) The phrase "according to the opinion of the Eastern Grammarians" V. 4. 101 is to be read into this sûtra. Thus in the alternative we have द्व्यञ्जलिप्रियः ॥

अनसन्तान्नपुंसकाच्छन्दसि ॥ १०३ ॥ पदानि ॥ अनसन्तात्, नपुंसकात्, छन्दसि, (टच्) ॥

वृत्तिः ॥ अन्नन्तादसन्ताच्च नपुंसकलिङ्गात्तत्पुरुषाट्टच्प्रत्ययो भवति छन्दसि विषये ॥

वार्त्तिकम् ॥ अनसन्तान्नपुंसकाच्छन्दसि वावचनम् ॥

103. In the Chhandas, the affix ṭach comes after a Tatpurusha compound in Neuter Gender ending in अन् or अस् ॥

Thus हस्ति+चर्मन्=हस्तिचर्मम् as in हस्तिचर्मे जुहोति, so also ऋषभचर्मेऽभिषिंचति ॥ So also when a word ends in अस् as, देवच्छन्दसानि (देव+छन्दस्=देव+छन्दस्+टच्= देवच्छन्दसम्) so also मनुष्य च्छन्दसानि ॥

Why do we say "when ending in अन् or अस्"? Observe बिल्वदारु जुहोति ॥ Why do we say "in the Neuter"? Observe सुत्रामाणं पृथिवीं द्यामनेहसम् ॥

Vârt :—The word वा "optionally" should be read into the sûtra. Therefore टच् is optionally added, as ब्रह्मसाम or ब्रह्मसामम्, देवच्छन्दः or देवच्छन्दसम् ॥

ब्रह्मणो जानपदाख्यायाम् ॥ १०४ ॥ पदानि ॥ ब्रह्मणः, जानपदाख्यायाम्, (टच्) ॥

वृत्तिः ॥ ब्रह्मन्शब्दान्तात्तत्पुरुषाट्टच्प्रत्ययो भवति समासेन चेद्ब्रह्मणो जानपदत्वमाख्यायते ॥

104. The affix ṭach comes after the word brahmaṇa in a Tatpurusha compound, when the compound denotes a person belonging to a certain country.

The word जानपदः = जनपदेषु भवः 'belonging to a country'. This affix comes after that Tatpurusha the first member of which is a word denoting a country. Thus सुराष्ट्रेषु ब्रह्मा = सुराष्ट्रब्रह्मः, and अवन्तिब्रह्मः "a Brâhmaṇa of Śurashṭra or Avanti". This is an example of Locative Tatpurusha compound.

Why do we say "when referring to the name of a country"? Observe देवब्रह्मा नारदः 'Narada the bard of the gods'.

कुमहद्भ्यामन्यतरस्याम् ॥१०५॥ पदानि ॥ कु, महद्भ्याम्, अन्यतरस्याम्, (टच्) ॥

वृत्तिः ॥ कुमहद्भ्यां परो यो ब्रह्मा तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवत्यन्यतरस्याम् ॥

105. The affix ṭach comes optionally after the word brahmaṇ preceded by the words कु and महत्, in a Tatpurusha compound.

Thus कुब्रह्मः or कुब्रह्मा, महाब्रह्मः or महाब्रह्मा ॥ The word ब्रह्मन् is a synonym of ब्राह्मण "a Brâhmaṇa".

द्वन्द्वाच्चुदषहान्तात्समाहारे ॥ १०६ ॥ पदानि ॥ द्वन्द्वात्, चु, द, ष, हान्तात्, समाहारे (टच्) ॥

वृत्तिः ॥ तत्पुरुषाधिकारो निवृत्तः । द्वन्द्वाच्चवर्गान्ताद् दकारान्तात् षकारान्तात् हकारान्ताच्च टच् प्रत्ययो भवति, स चेद् द्वन्द्वः समाहारे वर्त्तते नेतरेतरयोगे ॥

106. The affix ṭach comes after a Dvandva compound ending in a palatal, or a द् or a ष् or a ह् when the compound is a Samâhâra Dvandva (collective noun taken as a unity.)

The anuvritti of Tatpurusha which commenced at V. 4. 86, ceases. The rule applies to समाहारद्वन्द्व "an aggregate Dvandva" which is always in Neuter singular; and not to इतरेतरद्वन्द्व "or mutual conjunction". Thus वाक् च त्वक् च = वाक्त्वचम्, so also स्रक्त्वचम्, श्रीस्रजम्, इडूर्जम्, वागूर्जम्, समिद्दृषदम्, संपद्विपदम्, वाग्विप्रुषम्, छत्रोपानहम्, धेनुगोदुहम् ॥

Why do we say "after a Dvandva"? The affix will not come after a Tatpurusha, as, पंच वाचः समाहृताः = पंचवाक् ॥ Why do we say "when ending in a consonant of च class, or द, ष and ह"? Observe वाक्समित् ॥ Why do we say "in a Samâhâra Dvandva"? Observe प्रावृट्शरदौ ॥

अव्ययीभावे शरत्प्रभृतिभ्यः ॥ १०७ ॥ पदानि ॥ अव्ययीभावे, शरत्प्रभृतिभ्यः, (टच्) ॥

वृत्तिः ॥ शरदित्येवमादिभ्यः प्रातिपदिकेभ्यष्टच् प्रत्ययो भवत्यव्ययीभावे ॥

107. The affix ṭach comes after the words śarat &c, when forming an Avyayîbhâva compound.

Thus शरदः समीपम् = उपशरदम्, प्रतिशरदम्, उपविपाशम्, प्रतिविपाशम् ॥

Why do we say when forming an Avyayîbhâva compound? Observe परमशरत् ॥ Those words of शरदादि class which end in a झय् consonant add invariably (नित्य) the affix ṭach in spite of V. 4. 111. The anuvṛitti of avayayîbhâva extends upto V. 4. 113.

1 शरद्. 2 विपाश्, 3 अनस्, 4 मनस्, 5 उपानह्, 6 अनडुह्, 7 दिव्, 8 हिमवत्, 9 हिरुक्*, 10 विद्*, 11 सद्*, 12 दिश्, 13 दृश्, 14 विश्, 15 चतुर्, 16 त्यद्*, 17 तद्, 18 यद्, 19 कियत्*, 20 जराया जरस् च (as उपजरसम्), 21 प्रतिपरसमनुभ्यो ऽक्ष्णः (as प्रत्यक्षं, परोक्षः, समक्षम्, and अन्वक्षम्, The second is Tatpursha) 22 पथिन्, 23 सदृश् ॥

अनश्च ॥ १०८ ॥ पदानि ॥ अनः, च ॥

वृत्तिः ॥ अन्नन्तादव्ययीभावाट्टच् प्रत्ययो भवति समासान्तः ॥

108. The affix ṭach comes after an Avayayîbhâva compound ending in अन्, as the final of the compound.

Thus उपराजम्, अध्यात्मम्, प्रत्यात्मम् ॥ The final अन् is elided by VI. 4. 144.

नपुंसकादन्यतरस्याम् ॥ १०९ ॥ पदानि ॥ नपुंसकात्, अन्यतरस्याम्, (टच्) ॥

वृत्तिः ॥ अन इत्येव । नपुंसकग्रहणमुत्तरपदविशेषणम् । अन्नन्तं यन्नपुंसकं तदन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति समासान्तः ॥

109. The affix ṭach comes optionally after an Avayayîbhâva compound, ending with a neuter word, whose final syllable is अन् ॥

The word अन् is understood here also. The word 'Neuter' qualifies, the second i. e. last term of the compound. This allows option, where as the previous sûtra had made it compulsory. Thus प्रतिचर्मम्, or प्रतिचर्म, उपचर्मम् or उपचर्म ॥

नदीपौर्णमास्याग्रहायणीभ्यः ॥ ११० ॥ पदानि ॥ नदी, पौर्णमासी, आग्रहायणीभ्यः, (टच्) ॥

वृत्तिः ॥ नदी पौर्णमासी आग्रहायणी इत्येवमन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति ॥

110. The affix ṭach comes optionally after an Avayayîbhâva ending in nadî, paurṇamâsî, and âgrahâyani.

Thus नद्याः समीपम्=उपनदम् or उपनदि, उपपौर्णमासम् or उपपौर्णमासि, उपाग्रहायणम् or उपाग्रहायणि ॥

झयः ॥ १११ ॥ पदानि ॥ झयः ॥

वृत्तिः ॥ झय इति प्रत्याहारग्रहणम् । झयन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति ॥

111. The affix ṭach comes optionally after an Avyayîbhâva compound ending in a letter of jhay class (a mute letter).

The झय् here means the pratyâhâra झय् i. e. all the Mute consonants. Thus उपसमिधम्, or उपसमित्, उपदृषदम् or उपदृषत् ॥

गिरेश्च सेनकस्य ॥ ११२ ॥ पदानि ॥ गिरेः, च, सेनाकस्य, (टच्) ॥

वृत्तिः ॥ गिरिशब्दान्तादव्ययीभावाट्टच् प्रत्ययो भवति सेनकस्याचार्यस्य मतेन ॥

112. The affix tach comes after an Avyayîbhâva compound ending in 'giri', according to the opinion of the Grammarian Senaka.

Thus अन्तर्गिरम् or अन्तर्गिरि, उपगिरम् or उपगिरि ॥ The name of Senaka is mentioned for the sake of respect (pujârtha), for the anuvritti of the word अन्यतरस्याम् "optionally" was understood here already.

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ॥ ११३ ॥ पदानि ॥ बहुव्रीहौ, सक्थि, अक्ष्णोः, स्वाङ्गात्, षच् ॥

वृत्ति ॥ स्वाङ्गवाची यः सक्थिशब्दो ऽक्षिशब्दश्च तदन्ताद्बहुव्रीहेः षच् प्रत्ययो भवति समासान्तः ॥

113. The affix shach comes after the words sakthi and akshi, final in a Bahuvrîhi compound and denoting a portion of one's body.

Thus दीर्घे सक्थि यस्य = दीर्घसक्थः, so also कल्याणाक्षः, लोहिताक्षः, विशालाक्षः ॥ The word सक्थ्यक्ष्णोः is genitive dual, while it ought to be ablative. Why do we say "in a Bahuvrîhi compound"? Observe परमसक्थिः, परमाक्षिः ॥ Why do we say "after sakthi and akshi?" Observe दीर्घजानुः, सुबाहुः ॥ Why do we say "when denoting a part of the body?" Observe दीर्घसक्थि शकटं, स्थूलाक्षिरिक्षुः ॥

The new affix षच् is employed instead of टच् for the sake of the accent. Thus चक्रसक्थी स्त्री, दीर्घसक्थी स्त्री ॥ By sûtra IV. 1. 41 the feminine of words ending in an affix having an indicatory ष् is formed by ङीष् and not ङीप् ॥ Had the affix here been टच्, then the feminine would have been formed by ङीप् (IV. 1. 15), which is anudâtta (III. 1. 4). Now by rule VI. 2. 198 the second term 'saktha' has *optionally* udâtta accent, on this final in a Bahuvrîhi. When therefore, it is not oxytone, then by adding ङीप् the final of दीर्घसक्थी would have been anudâtta, so that the feminine in one case would be oxytone, in the other not, which would be anomalous. But when ङीष् is added, it is *always* udâtta, which is desired : and removes the anomaly. The anuvritti of Bahuvrihi extends up to the end of the chapter.

अङ्गुलेर्दारुणि ॥ ११४ ॥ पदानि ॥ अङ्गुलेः, दारुणि, (षच्) ॥

वृत्ति ॥ अंगुलिशब्दान्ताद्बहुव्रीहेः षच्प्रत्ययो भवति समासान्तो दारुणि समासार्थे ।

114. The affix shach comes after a Bahuvrîhi compound ending in the word aṅguli, when the compound means "a piece of wood".

Thus द्व्यंगुलंदारु, त्र्यंगुलंदारु, so also पंचांगुलं ॥ This is the name of a wooden spoon or fork of the figure of a finger by which barley &c are scattered.

Why do we say "in a Bahuvrîhi"? Observe द्व्यङ्गुलयष्टिः = द्वे अंगुली प्रमाणमस्या ॥ It is a Tatpurusha compound formed by V. 4. 86, by adding अच् as samâsânta affix, the añguli meaning here *size* and not *figure*. Why do we say "when meaning a wood"? Observe पंचाङ्गुलिर्हस्तः ॥

द्वित्रिभ्यां ष मूर्ध्नः ॥ ११५ ॥   पदानि ॥ द्वि, त्रिभ्याम्, षः, मूर्ध्नः ॥

वृत्ति ॥ द्वित्रिभ्यां परो यो मूर्धन्शब्दस्तदन्ताद्बहुव्रीहेः षः प्रत्ययो भवति समासान्तः ।

115. The affix sha comes after a Bahuvrîhi compound ending in mûrdhan, and preceded by dvi and tri.

Thus द्विमूर्धः, त्रिमूर्धः ॥ The feminine is formed by ङीष् and the accent is regulated by VI. 2. 197.

Why do we say "preceded by dvi and tri?" Observe उच्चैर्मूर्धा ॥

अप्पूरणीप्रमाण्योः ॥ ११६ ॥   पदानि ॥ अप् पूरणी, प्रमाण्योः ॥

वृत्ति ॥ पूरणप्रत्ययान्ताः स्त्रीलिङ्गाः शब्दाः पूरणीग्रहणेन गृह्यन्ते ॥ प्रमाणीतिस्वरूपग्रहणम् । पूरण्यन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप्प्रत्ययो भवति समासान्तः ॥

वार्त्तिकम् ॥ अपि प्रधानपूरणीग्रहणं कर्त्तव्यम् ॥   वा० ॥ नेतुर्नक्षत्रउपसंख्यानम् ॥

वा० ॥ छन्दसि च नेतुरुपसंख्यानम् ॥   वा० ॥ मासाद्भृतिप्रत्ययपूर्वपदाट्ठच्विधिः ॥

116. The affix ap comes after a Bahuvrîhi compound ending in a feminine ordinal Numeral or in the word pramâṇî.

The word पूरणी means words in the feminine gender ending in an ordinal affix (V. 2. 48 &c). प्रमाणी means 'a witness, a principal'. Thus कल्याणी पंचमी आसां रात्रीणां = कल्याणीपंचमा रात्रयः "the nights, the fifth of which is auspicious". कल्याणीदशमा रात्रयः । So also स्त्री प्रमाणी एषां = स्त्रीप्रमाणाः कुटुम्बिनः meaning भार्याप्रधानाः "having a woman for authority".

Vârt:—The affix अप् applies when the Ordinal Numeral is the principal (pradhâna) member in a compound. When the Ordinal enters fully into another object, and is not merely wrapped up as it were in another object in a secondary way, there the Ordinal is the principal. The prohibition of puṅvad-bhâva—the change of feminine into masculine ordained by VI. 3. 24—applies also to the Ordinal when it is pradhâna. Therefore, the affix is not added here. कल्याणपंचमीकः पक्षः = कल्याणी पंचमी अस्मिन् पक्षे ॥

Vârt:—The affix अप् comes after नेतृ when preceded by a word denoting asterism. As मृगनेत्रा रात्रयः = मृगो नेता आसां रात्रीणां "the night whose leader is the asterism mriga" so also पुष्यनेत्राः ॥ Why do we say "an asterism"? Observe देवदत्तनेतृकाः ॥

Vârt:—The affix अप् comes after नेतृ in the Chhandas. As, बृहस्पतिनेत्रा देवाः, सोमनेत्राः ॥

Vârt:—The affix ठच् comes after the word मास when preceded by an ordinal having an affix denoting wages of service. Thus पंचको मासोऽस्य = पंचक

मासिकः कर्मकरः so also दशकमासिकः कर्मकरः ॥ Sûtra V. 1. 56 gives the rule for forming words denoting 'wages' by adding कन् (V. 1. 22). Therefore दशक-मासिकः means "an artist whose monthly wages are ten coins".

अन्तर्बहिर्भ्यां च लोम्नः ॥११७॥ पदानि ॥ अन्तर्, बहिः भ्याम्, च लोम्न,(अप्)

वृत्तिः ॥ अन्तर् बहिस् इत्येताभ्यां परो यो लोमन्शब्दस्तदन्ताद्बहुव्रीहेरप्प्रत्ययो भवति ॥

117. The affix ap comes after a Bahuvrîhi ending in loman and preceded by antar and bahis.

Thus अन्तर्गतानि लोमान्यस्य = अन्तर्लोमः प्रावारः 'a cloak having the hairy surface inside'. Similarly बहिर्लोमः पटः ॥

अच्नासिकायाः संज्ञायां नसं चास्थूलात् ॥ ११८ ॥ पदानि ॥ अच्, नासिकायाः, संज्ञायाम्, नसम्, च, अस्थूलात् ॥

वृत्तिः ॥ नासिकान्ताद्बहुव्रीहेरच्प्रत्ययो भवति नासिकाशब्दश्च नसमादेशमापद्यते ॥

वार्त्तिकम् ॥ खुरखराभ्यां नस् वक्तव्यः ॥

118. The affix ach is added to the word nâsikâ final in a Bahuvrîhi, when it expresses a Name, whereby nas is substituted for nâsikâ, but not so when the word sthûla precedes the word nâsikâ.

Thus द्रुरिव नासिकाऽस्य = द्रुणसः, वार्ध्रीणसः ॥ The न is changed to ण by VIII. 4. 3 so also गोनसः ॥ Why do we say "when it is a Name"? Observe तुंगनासिकः ॥ Why do we say "not after स्थूल?" Observe स्थूलनासिको वराह ॥

Vârt:—After the words खुर and खर, for नासिका is substituted नस् but no affix is added: as, खुरणाः, खरणाः ॥ In the alternative, the affix अच् is added, as खुरणसः, खरणसः ॥

Ishti:—The forms शितिनाः, अर्चनाः and अहिनाः are valid in the Revelation (the Vedas).

उपसर्गाच्च ॥ ११९ ॥ पदानि ॥ उपसर्गात्, च, (अच्) ॥

वृत्तिः ॥ उपसर्गात्परो यो नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् प्रत्ययो भवति नासिकाशब्दश्च नसमापद्यते ॥

वार्त्तिकम् ॥ वेर्ग्रो वक्तव्यः ॥

119. The affix ach comes after the word nâsikâ final in a Bahuvrîhi, when an upsarga precedes it, and नस् is substituted for नासिका ॥

This rule applies where the word is not a sañjñâ, as it was in the last. Thus उन्नता नासिकाऽस्य = उन्नसः, प्रणसः ॥ The न is changed into ण by VIII. 4. 28.

Vârt:—The ग्र is substituted for नासिका when वि precedes it. As, विगतानासिकाऽस्य = विग्रः, so also विख्यः in the same sense.

सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ॥ १२० ॥ पदानि ॥ सुप्रात, सुश्व, सुदिव, शारिकुक्ष, चतुरश्र, एणीपद, अजपद, प्रोष्ठपदाः ॥

वृत्तिः ॥ सुप्राताद्यो बहुव्रीहिसमासा अच्प्रत्ययान्ता निपात्यन्ते । अन्यदपि च टिलोपादिकं निपातनादेव सिद्धम् ॥

120. The following Bahuvrîhis are irregularly formed by adding ach :—su-prâta, su-śva, su-diva, śârikuksha, chaturaśra, eṇî-pada, aja-pada, and proshṭha-pada.

In some of the above compounds the टि (syllable) is elided. शोभनं प्रातरस्य = सुप्रातः, शोभनं श्वोऽस्य = सुश्वः, शोभनं दिवाऽस्य = सुदिवः ॥ शारेरिव कुक्षिरस्य = शारिकुक्षः, चतस्रोऽश्रयोऽस्य = चतुरश्रः, एण्या इव पादावस्य = एणीपदः, So अजपदः, प्रोष्ठो गौः, तस्येव पादावस्य = प्रोष्ठपादः ॥

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ १२१ ॥ पदानि ॥ नञ्, दुः, सुभ्यः, हलि, सक्थ्योः, अन्यतरस्याम्, (अच्) ॥

वृत्तिः ॥ नञ् दुस् सु इत्येतेभ्यः परौ यौ हलिसक्थिशब्दौ तदन्ताद्बहुव्रीहेरन्यतरस्यामच् प्रत्ययो भवति समासान्तः ॥

121. The affix ach comes optionally after the words hali and sakthi, final in a Bahuvrîhi, when preceded by a Negative particle or by the words dus and su.

Thus अविद्यमाना हलिरस्य = अहलः or अहलिः, दुर्हलः or दुर्हलिः, सुहलः or सुहलिः ॥ So also असक्थः, असक्थिः, दुःसक्थः or दुःसक्थिः, सुसक्थः or सुसक्थिः ॥

Some read the text as हलिशक्त्योः ॥ According to this reading we have अशक्तिः or अशक्तः, दुःशक्तिः or दुःशक्तः (विरूपा शक्तिरस्य), सुशक्तिः or सुशक्तः ॥

नित्यमसिच् प्रजामेधयोः ॥१२२॥ पदानि ॥ नित्यम्, असिच्, प्रजा, मेधयोः ॥

वृत्तिः ॥ नञ्दुस्सुभ्य इत्येव । नञ् दुस् सु इत्येतेभ्यः परौ यौ प्रजामेधाशब्दौ तदन्ताद्बहुव्रीहेर्नित्यमसिच् प्रत्ययो भवति समासान्तः ।

122. The affix asich (असु) comes invariably after prajâ and medhâ, final in a Bahuvrîhi, when the above particles नञ्, सु and दुस् precede them.

Thus अविद्यमाना प्रजाऽस्य = अप्रजस् nom. s. अप्रजा, so also दुष्प्रजा, सुप्रजा, अमेधा, दुर्मेधा, सुमेधा ॥ The word "invariably" (नित्य) shows that the anuvritti of the word "optionally" of the last sûtra does not run here. The word nitya also indicates that the affix *ach* comes after prajâ and medhâ even when preceded by other words. As:

श्रोत्रियस्येव ते राजन्मन्दकस्याल्पमेधसः
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ॥

बहुप्रजाश्छन्दसि ॥ १२३ ॥ पदानि ॥ बहुप्रजाः, छन्दसि ॥

वृत्तिः ॥ बहुप्रजा इति छन्दसि निपात्यते ॥

123. The form bahuprajas is valid in the Vedas.

Thus बहुप्रजा निर्ऋतिमाविवेश ॥ In the secular literature, the form is बहुप्रजः, as बहुप्रजो ब्राह्मणः ॥

धर्मादनिच् केवलात् ॥ १२४ ॥ पदानि ॥ धर्मात्, अनिच् , केवलात् ॥
वृत्तिः ॥ केवलाद् यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच्प्रत्ययो भवति समासान्तः ॥

124. The affix anich (अन्) comes after the word dharma, when it is the last member of a Bahuvrîhi compound, and is itself the only word without any other word joined with it or when the first member is a single word.

Thus कल्याणो धर्मोऽस्य = कल्याणधर्मन् nom. sin. कल्याणधर्मा so also प्रियधर्मा ॥ Why do we say केवलात् "when it alone is the last member"? Observe परमः स्वो धर्मोऽस्य = परमस्वधर्मः ॥ The word केवलात् according to Kâsikâ qualifies the word पूर्वपद understood. That is, the first member must be *one* word though a *compound* word, according to Kaumudi, and it explains such forms as सन्दिग्धसाध्यधर्मा, अनुच्छित्तिधर्मा (e. g. अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा) ॥ According to Prasâdakâra केवलात् qualifies both the words धर्मात् and पूर्वपदात् ॥

जम्भा सुहरिततृणसोमेभ्यः ॥१२५॥ पदानि ॥ जम्भा, सु, हरित, तृण, सोमेभ्यः ॥
वृत्तिः ॥ बहुव्रीहौ समासे स्वादिभ्यः परं जम्भेति कृतसमासान्तमुत्तरपदं निपात्यते ॥

125. The word jambhan stands at the ending of a Bahuvrîhi, when preceded by su, harita, triṇa, and soma.

The जम्भन् is a word that has already taken the samâsânta affix अन् irregularly, and means 'food' or 'tooth'. Thus सुजम्भन्, as (शोभनो जम्भोऽस्य), सुजम्भा देवदत्तः so also हरितजम्भा, तृणजम्भा (तृणं भक्ष्यं यस्य) सोमजम्भा ॥ When it means 'tooth', the compound should be analysed as, तृणमिव or सोममिव जम्भोऽस्य ॥ If su &c do not precede it, we have पतितजम्भः ॥

दक्षिणेर्मा लुब्धयोगे ॥ १२६ ॥ पदानि ॥ दक्षिणेर्मा, लुब्धयोगे ॥
वृत्तिः ॥ दक्षिणेर्मेति कृतसमासान्तो निपात्यते बहुव्रीहौ समासे लुब्धयोगे ॥

126. The form dakshiṇerman is an irregularly formed Bahuvrîhi, when used in conjunction with a hunter.

The word लुब्ध means व्याध or a fowler, a hunter. Thus दक्षिणमीर्ममस्य = दक्षिणेर्मा मृगः 'a stag wounded by the hunter on the right flank'. But in the following verse:—शाली हेमाब्जमाली गुणनिधिरिगुणानिर्मितो दक्षिणेर्मा, it denotes merely hunting. The word ईर्मम् means 'a wound'. Why do we say 'in reference to a hunter'? Observe दक्षिणेर्मम् शकटम् ॥

इच् कर्मव्यतिहारे ॥ १२७ ॥ पदानि ॥ इच्, कर्मव्यतिहारे ॥
वृत्तिः ॥ कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच् प्रत्ययो भवति । तत्र तेनेदमिति सरूपइत्ययं बहुव्रीहिर्गृह्यते ॥

127, The affix ich comes after a Bahuvrîhi when the compound denotes the reciprocity of an action.

The compound denoting reciprocity of action is formed by II. 2. 27. Thus केशाकेशि = केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं ॥ So also कचाकचि, मुसलामुसलि, दण्डा-

दण्डि ॥ The affix इच् forms also avyayibhâva compounds, as it occurs in the list of तिष्ठद्गु words II. 1. 17.

द्विदण्ड्यादिभ्यश्च ॥ १२८ ॥ पदानि ॥ द्विदण्ड्यादिभ्यः, च ॥

वृत्तिः ॥ द्विदण्ड्यादयः शब्दा इच्प्रत्ययान्ताः साधवो भवन्ति । द्विदण्ड्यादिभ्य इति तादर्थ्ये एषा चतुर्थी, न पञ्चमी ॥

128. The words dvidaṇḍi &c are valid forms in ich.

The word द्विदण्ड्यादिभ्यः is in the dative case, and not the Ablative case. The dative here has the force of "for the purpose of that" (II. 1. 36). This word is therefore equal to द्विदण्ड्यर्थमिच् प्रत्ययो भवति "the affix इच् comes for the sake of the words dvidaṇḍi &c", i. e. it comes in such a way as to form the words dvidaṇḍi &c. These words are used in fixed senses. Thus द्विदण्डि प्रहरति, द्विमुसलि प्रहरति, but not here, द्विदण्डा शाला ॥ Though the context is that of Bahuvrîhi, yet some of these words are Tatpurusha : as निकुच्य कर्णौ धावति = निकुच्यकर्णि धावति ॥ प्रोह्यपादौ हस्तिनं वाहयति = प्रोह्यपादि हस्तिनं वाहयति ॥ The compounding takes place by II. 1. 72.

1 द्विदण्डि, 2 द्विमुसलि, 3 उभाञ्जलि, 4 उभयाञ्जलि, 5 उभादन्ति, 6 उभयादन्ति, 7 उभाहस्ति, 8 उभयाहस्ति, 9 उभाकर्णि, 10 उभयाकर्णि, 11 उभापाणि, 12 उभयापाणि, 13 उभाबाहु, 14 उभयाबाहु, 15 एकपदि, 16 प्रोह्यपदि, 17 आढ्यपदि, (आच्यपदि), 18 सपदि, 19 निकुच्यकर्णि, 20 संहतपुच्छि, 21 अन्तेवासि ॥

प्रसम्भ्यां जानुनोर्ज्ञुः ॥ १२९ ॥ पदानि ॥ प्र, सम् भ्याम्, जानुनोः, ज्ञुः ॥

वृत्तिः ॥ प्र सम् इत्येताभ्यामुत्तरस्य जानुशब्दस्य ज्ञुरादेशो भवति समासान्तो बहुव्रीहौ ॥

129. After the words pra and sam, there is the substitution of jñu for jânu, when forming the Bahuvrîhi compound.

Thus प्रकृष्टे जानुनी अस्य = प्रज्ञुः, So also संज्ञुः ॥

ऊर्ध्वाद्विभाषा ॥ १३० ॥ पदानि ॥ ऊर्ध्वात्, विभाषा (ज्ञुः) ॥

वृत्तिः ॥ ऊर्ध्वशब्दादुत्तरस्य जानुशब्दस्य विभाषा ज्ञुरित्ययमादेशो भवति ॥

130. The substitution of jñu for jânu is optional, when the word ûrdhva precedes it.

Thus ऊर्ध्वे जानुनी अस्य = ऊर्ध्वजानुः or ऊर्ध्वज्ञुः ॥

ऊधसो ऽनङ् ॥ १३१ ॥ पदानि ॥ ऊधसः, अनङ् ॥

वृत्तिः ॥ ऊधःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति समासान्तः ॥

131. The syllable anań is the substitute of the final of ऊधस् in a Bahûvrîhi.

As कुण्डमिव ऊधोऽस्याः = कुण्डोध्नी, घटोध्नी ॥ The feminine is formed by adding ङीष् (IV. 1. 25); and these words are always used in this form for the feminine only; no substitution takes place in the masculine, as महोधाः पर्जन्यः.

घटोध्नी धेनुकम् ॥ ऊधस + मन् = ऊधन् (VI. 4. 148). ऊधन् + ङीष् = ऊध्न् + ई (अ being elided by VI. 4. 134) = ऊध्नी ॥

धनुषश्च ॥ १३२ ॥ पदानि ॥ धनुषः, च ॥

वृत्तिः ॥ धनुःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति ॥

132. The anaṅ is the substitute of the final of dhanus in a Bahuvrîhi.

As शार्ङ्गं धनुरस्य = शार्ङ्गधन्वन् nom. s. शार्ङ्गधन्वा ॥ So also गाण्डीवधन्वा, पुष्पधन्वा, अधिज्यधन्वा ॥

वा संज्ञायाम् ॥ १३३ ॥ पदानि ॥ वा, संज्ञायाम्, (अनङ्) ॥

वृत्तिः ॥ धनुःशब्दान्ताद्बहुव्रीहेरनङादेशो वा भवति संज्ञायां विषये । पूर्वेण नित्यः प्राप्तो विकल्प्यते ॥

133. The substitution of अनङ् does not optionally take place when the Bahuvrîhi is a Name.

This declares an option, where the last sûtra had made the substitution compulsory. As शतधनुः or शतधन्वा, दृढधनुः or दृढधन्वा ॥

जायाया निङ् ॥ १३४ ॥ पदानि ॥ जायायाः, निङ् ॥

वृत्तिः ॥ जायाशब्दान्तस्य बहुव्रीहेर्निङादेशो भवति ॥

134. For the final of जाया is substituted निङ् in a Bahuvrîhi.

Thus युवतिर्जाया यस्य = युवजानिः (जाया + निङ् = जाय् + निङ् = जा + नि, the य् being elided by VI. 1. 66). So also वृद्धजानिः ॥ There is punvad-bhava also.

गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥ १३५ ॥ पदानि ॥ गन्धस्य, इत्, उत्, पूति, सु, सुरभिभ्यः ॥

वृत्तिः ॥ उत् पूति सु सुरभि इत्येतेभ्यः परस्य गन्धशब्दस्य इकारादेशो भवति सामासान्तो बहुव्रीहौ समासे ।

135. For the final of गन्ध is substituted इ when preceded by उत्, पूति, सु and सुरभि in a Bahuvrîhi.

Thus the अ of गन्ध is replaced by इ, as उद्गन्धिः, पूतिगन्धिः, सुगन्धिः, सुरभिगन्धिः ॥ Why after these only? See तीव्रगन्धा वातः ॥

Vârt:—The word गन्ध is a material noun as गन्धान् पिनष्टि, and an adjective as चन्दनगन्धः 'having the scent of sandal'. The rule of substitution applies when it is used as an attribute. Therefore, not here, शोभना गन्धा अस्य = सुगन्ध आपणिकः "a shop-keeper having many sweet perfumes for sale".

अल्पाख्यायाम् ॥ १३६ ॥ पदानि ॥ अल्पाख्यायाम्, (इत्) ॥

वृत्तिः ॥ अल्पाख्यायां यो गन्धशब्दस्तस्येकारादेशो भवति समासान्तो बहुव्रीहौ समासे ॥

136. The इ is substituted for the final अ of गन्ध at the end of a Bahuvrîhi compound, when गन्ध means 'a little'.

Thus सूपोऽल्पोऽस्मिन् = सूपगन्धि भोजनम् "food with a little broth". So घृतगन्धि "food with a little—a mere scent-of ghee'. So क्षीरगन्धि ॥ Here गन्ध is a synonym of अल्प ॥

उपमानाच्च ॥ १३७ ॥ पदानि ॥ उपमानात्, च, (इत्) ॥

वृत्तिः ॥ उपमानात्परो यो गन्धशब्दस्तस्यैकारादेशो भवति समासान्तो बहुव्रीहौ समासे ॥

137. The इ is substituted for the final अ of गन्ध at the end of Bahuvrîhi, when preceded by a word denoting a thing with which it is compared.

As पद्मस्येव गन्धोऽस्य = पद्मगन्धिः, उत्पलगन्धिः करीषगन्धिः ॥

पादस्य लोपो ऽहस्त्यादिभ्यः ॥ १३८ ॥ पदानि ॥ पादस्य, लोपः, अहस्त्यादिभ्यः ॥

वृत्तिः ॥ उपमानादित्येव । उपमानाद्धस्त्यादिविवर्जितात्परस्य पादशब्दस्य लोपो भवति समासान्तो बहुव्रीहौ समासे ॥

138. The final अ of पाद is elided when it is at the end of a Bahuvṛihi compound, preceded by a word denoting a thing with which it is compared, but not so when such word is हस्ति &c.

The word उपमानात् is understood here. The लोप substitution is a samâsânta affix in a way. Thus व्याघ्रस्येव पादावस्य = व्याघ्रपात्, सिंहपात् ॥ But हस्तिपादः, कटोलपादः ॥

1 हस्तिन्, 2 कुद्दाल*, 3 अश्व°, 4 कशिक°, 5 कुरुत, 6 कटोल, 7 कटोलक°, 8 गण्डोल, 9 गण्डोलक, 10 कण्डोल*, 11 कण्डोलक*, 12 अज*, 13 कपोत°, 14 जाल*, 15 गण्ड*, 16 महेला, (महिला), 17 दासी, 18 गणिका, 19 कुसूल. ॥

कुम्भपदीषु च ॥ १३९ ॥ पदानि ॥ कुम्भपदीषु, च, (लोपः) ॥

वृत्तिः ॥ कुम्भपदीप्रभृतयः कृतपादलोपाः पठ्यन्ते समुदाया एव । तत्रैवंसूत्रं ज्ञेयम् । पादस्य लोपो भवति कुम्भपद्यादिविषये । यथा कुम्भपद्यादयः सिध्यन्ति ॥

139. The words kumbhapadî &c, have been formed by the similar elision of the अ of पाद ॥

The forms कुम्भपदी &c, are formed by eliding the final अ of पाद, and then substituting पद् for पात् before the feminine affix ई by IV. 4. 130. This substitution takes place only before the feminine affix ङीप्, and no where else, as कुम्भपदी, शतपदी ॥ Those words in the list, the first members of which denote an object of comparison or a numeral, would have elided अ by V. 4. 138 or V. 4. 140. In their case, this sûtra teaches the invariable affixing of ङीप् to such words ; so that the optional rule IV. 1. 8 does not apply to them.

1 कुम्भपदी, 2 एकपदी, 3 जालपदी, 4 शूलपदी,* 5 मुनिपदि, 6 गुणपदी,* 7 शतपदी, 8 सूत्रपदी, 9 गोधापदी, 10 कलशीपदी, 11 विपदी,* 12 तृणपदी,* 13 द्विपदी, 14 त्रिपदी*, 15 षट्पदी*, 16 दासीपदी 17 शितिपदी*, 18 विष्णुपदी*, 19 सुपदी, 20 निष्पदी, 21 आर्द्रपदी, 22 कुणिपदी, (कुणपदी), 23 कृष्णपदी, 24 शुचिपदी*, 25 द्रोणपदी, (द्रोणीपदी), 26 द्रुपदी, 27 सूकरपदी, 28 शकृत्पदी, 29 अष्टापदी, 30 स्थूणापदी, (स्थूलपदी), 31 अपदी*, 32 सूचीपदी, 33 मालापदी, 34 गोपदी, 35 घृतपदी, 36 सूपपदी, 37 पञ्चपदी, 38 अर्वपदी, 39 स्तनपदी, 40 कलहंसपदी, 41 विषपदी ॥

संख्यासुपूर्वस्य ॥ १४० ॥ पदानि ॥ संख्या, सुपूर्वस्य, (लोपः) ॥
वृत्तिः ॥ संख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेः पादशब्दान्तस्य लोपो भवति समासान्तः ॥

140. The final अ of पाद is elided also when a Numeral or the word सु precedes it, in a Bahuvrîhi.

Thus द्वौ पादावस्य = द्विपात्, त्रिपात्, so also शोभनौ पादावस्य = सुपात् ॥

वयसि दन्तस्य दतृ ॥ १४१ ॥ पदानि ॥ वयसि, दन्तस्य, दतृ ॥
वृत्तिः ॥ संख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेर्यो दन्तशब्दस्तस्य दतृ इत्ययमादेशो भवति सामासान्तो वयसि गम्यमाने ।

141. For दन्त is substituted दतृ in a Bahuvrîhi, when a Numeral or सु precedes it, and the whole word expresses a stage of life i. e. an age.

The ऋ of दतृ is indicatory, making Rule VII. 1. 70 applicable, by which a nasal is added before त् in declining these words in sarvanamasthâna cases: and rule IV. 1. 6 also applies to them. All rules relating to उगित् apply to these. Thus द्वौ दन्तावस्य = द्विदन् "a child of the age in which two teeth have appeared". So also त्रिदन्, चतुर्दन् ॥ शोभनादन्ताअस्य समस्ता जाताः = सुदन् कुमारः "a boy of the age in which all his teeth have appeared beautifully". Why do we say denoting 'age'? Observe द्विदन्तः कुंजरः ॥

छन्दसि च ॥ १४२ ॥ पदानि ॥ छन्दसि, च, (दतृ) ॥
वृत्तिः ॥ छन्दसि च दन्तशब्दस्य दतृ इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे ॥

142. For danta is substituted dat in the Vedas, when final in a Bahuvrîhi.

Thus पत्रदन्तमालभेत, उभयदत आलभेत ॥

स्त्रियां संज्ञायाम् ॥ १४३ ॥ पदानि ॥ स्त्रियाम्, संज्ञायाम्, (दतृ) ॥
वृत्तिः ॥ स्त्रियामन्यपदार्थे संज्ञायां विषये दन्तशब्दस्य दतृ इत्ययमादेशो भवति ॥

143. For danta is substituted dat when in the feminine gender denoting a name.

Thus अयोदती, फालदती ॥ Why do we say when denoting a Name? Observe समदन्ती, स्निग्धदन्ती ॥

विभाषा श्यावारोकाभ्याम् ॥१४४॥ पदानि ॥ विभाषा, श्याव, आरोकाभ्याम् (दतृ) ॥
वृत्तिः । श्याव अरोक इत्येताभ्यां परस्य दन्तशब्दस्य दतृ इत्ययमादेशो भवति ॥

144. Optionally dat is substituted for danta, in a Bahuvrîhi compound, when it is preceded by the words śyâva and aroka.

Thus श्यावदन्तः or श्यावदन्, अरोकदन्तः or अरोकदन् ॥ अरोक means 'dark' 'non-luminous'. The word संज्ञायाम् of the last sûtra governs this also, so that

when the compound is not a Name, the substitution does not take place; as श्यावदन्तः, अरोकदन्तः ॥

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥ १४५ ॥ पदानि ॥ अग्रान्त, शुद्ध, शुभ्र, वृष, वराहेभ्यः, च, (दतृ) ॥

वृत्तिः ॥ विभाषेत्येव । अग्रान्ताच्छब्दात् शुद्ध शुभ्र वृष वराह इत्येतेभ्यश्च परस्य दन्तशब्दस्य विभाषा दतृ इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे ॥

145. The substitution of dat for danta is optional in a Bahuvrîhi, when it is preceded by a word ending in अग्र or by शुद्ध, शुभ्र, वृष and वराह ॥

The word "optionally" is understood here also. Thus कुड्मलाग्रदन्, or कुड्मलाग्रदन्तः, so also शुद्धदन्तः or शुद्धदन्, शुभ्रदन्तः or शुभ्रदन्, वृषदन्तः or वृषदन्, वराहदन्तः or वराहदन् ॥

The च of the sûtra indicates that the substitution optionally takes place in other cases not enumerated: as अहिदन्तः or अहिदन्, मूषिकदन् or मूषिकदन्तः, गर्दभदन्तः or गर्दभदन्, शिखरदन्तः or शिखरदन् ॥

ककुदस्यावस्थायां लोपः ॥ १४६ ॥ पदानि ॥ ककुदस्य, अवस्थयां, लोपः ॥

वृत्तिः । ककुदशब्दान्तस्य बहुव्रीहेर्लोपो भवति समासान्तो ऽवस्थायां गम्यमानायाम् । कालादिकृता वस्तु-धर्मा वयःप्रभृतयो ऽवस्था इत्युच्यते ॥

146. The final letter of kakuda is dropped in a Bahuvrîhi, when it denotes age or condition of animals.

The word अवस्था means the changes which things undergo by lapse of time, such as age &c. Thus असंजातं ककुदमस्य = असंजातककुत् = बालः "the young of an animal". पूर्णककुत् = मध्यमवया "middle—aged animal": उन्नतककुत् = वृद्धवया "old". स्थूलककुत् = बलवान् 'strong', यष्टिककुत् = नातिस्थूलो नातिकृशः ॥

Why do we say when denoting a condition? Observe श्वेतककुदः ॥

त्रिककुत्पर्वते ॥ १४७ ॥ पदानि ॥ त्रिककुत, पर्वते ॥

वृत्तिः ॥ त्रिककुदि बहुव्रीहौ ककुदशब्दस्य लोपः समासान्तो निपात्यते पर्वते ऽभिधेये ।

147. The Bahuvrîhi word Trikakud, formed by the elision of the final अ of kakuda, is the name of a mountain.

त्रीणिककुदान्यस्य = त्रिककुत् "a three-peaked hill, the peaks having the shape of a hump". All three-peaked hills are not so called it is the name of a particular hill. When not denoting a hill we have त्रिककुदः ॥

उद्विभ्यां काकुदस्य ॥ १४८ ॥ पदानि ॥ उद्, विभ्याम्, काकुदस्य, (लोपः)

वृत्तिः ॥ उत् वि इत्येताभ्यां परस्य काकुदशब्दस्य लोपो भवति बहुव्रीहौ समासे ॥

148. After ut and vi, the final of kâkuda is elided in a Bahuvrîhi compound.

Thus उन्नतंकाकुदमस्य = उत्काकुत्, so also विकाकुत् ॥ The word काकुद means 'palate'.

पूर्णाद्विभाषा ॥ १४९ ॥ पदानि ॥ पूर्णात्, विभाषा, (लोपः) ॥

वृत्तिः ॥ पूर्णात्परस्य काकुदशब्दस्य विभाषा लोपो भवति बहुव्रीहौ समासे ॥

149. After pûrṇa, the final of kâkuda is optionally elided in a Bahuvrîhi compound.

Thus पूर्णम् काकुदमस्य = पूर्णकाकुत् or पूर्णकाकुदः ॥

सुहृद्दुर्हृदौ मित्रामित्रयोः ॥ १५० ॥ पदानि ॥ सुहृद, दुर्हृदौ, मित्र, अमित्रयोः ॥

वृत्तिः ॥ सुहृत् दुर्हृत् इति निपात्यते यथासंख्यं मित्रामित्रयोरभिधेययोः । सुशब्दात्परस्य हृदयशब्दस्य हृद्भावो निपात्यते बहुव्रीहौ, तथा दुःशब्दात्परस्य ।

150. The words suhṛit and durhṛit are irregularly formed Bahuvrîhi compounds, denoting "a friend" and "a foe" respectively.

The word सुहृत् is derived from सु + हृदय, the अय of हृदय being elided in the Bahuvrîhi. It means one whose heart is favourably disposed towards another. So also दुर्हृत् is derived from दुर् + हृदय, he whose heart is evil.

Why do we say "when meaning a friend and a foe respectively"? Observe सुहृदयः कारुणिकः 'the kind-hearted, merciful', दुर्हृदयश्चोरः "the evil hearted thief".

उरःप्रभृतिभ्यः कप् ॥ १५१ ॥ पदानि ॥ उरः प्रभृतिभ्यः, कप् ॥

वृत्तिः ॥ उरःप्रभृत्यन्ताद्बहुव्रीहेः कप् प्रत्ययो भवति ।

151. The affix कप् comes after uras &c final in a Bahuvrîhi compound.

Thus व्यूढोरस्कः = व्यूढमुरोऽस्य ॥ So also प्रियसर्पिष्कः, अवमुक्तोपानत्कः ॥

The words पुमान्, अनड्वान्, पयः, नौः and लक्ष्मीः are exhibited in the list of urasâdi words as nominative singular, and not in their crude-forms as is the case with other words. The reason of this is, that the singular number of these words take the affix कप्, and not their dual and plural numbers. With regard to the dual and plural of these, the affix कप् is optionally added by force of sûtra V. 4. 154. Thus द्विपुमान् or द्विपुंस्कः, बहुपुमान् or बहुपुंस्कः ॥

1 उरस्, 2 सर्पिस्, 3 उपानह्, 4 पुमान्, 5 अनड्वान्, 6 पयस्, 7 नौः, 8 लक्ष्मीः, 9 दधि, 10 मधु, 11 शालि, 12 अर्थान्नञः ॥ (The affix कप् is added to अर्थ when preceded by the Negative particle नञ्, as अनर्थकः)

इनः स्त्रियाम् ॥ १५२ ॥ पदादि ॥ इनः, स्त्रियाम्, (कप्) ॥

वृत्तिः ॥ इन्नन्ताद्बहुव्रीहेः कप् प्रत्ययो भवति स्त्रियां विषये ॥

152. The affix कप् is added to a Bahuvrîhi the last member of which ends in इन्, when a feminine word is denoted.

Thus बहवो दण्डिनोऽस्यां शालायां = बहुदण्डिका शाला ॥ So also बहुछत्रिका; बहुस्वामिका नगरी, बहुवाग्मिका सभा ॥ Why do we say when denoting a feminine? Observe बहुदण्डी राजा or बहुदण्डिकः ॥ The latter form is derived by adding कप् optionally under V. 4. 154.

नद्यृतश्च ॥ १५३ ॥ पदानि ॥ नदी, ऋतः, च, (कप्) ॥

वृत्तिः ॥ नद्यन्ताद्बहुव्रीहेर्ऋकारान्ताच्च कप् प्रत्ययो भवति ॥

153. The affix कप् is added to a Bahuvrîhi the last member of which is a feminine word ending in long ई or ऊ defined as nadî words, or which ends in a short ऋ ॥

The word नदी is defined in I. 4. 3. Thus बहुकुमारीको देशः (बह्व्यः कुमर्योऽस्मिन्देशे), बहुब्रह्मबन्धूकः ॥ बहुकर्तृकः ॥ The त in ऋत् is for the sake of euphony.

शेषाद्विभाषा ॥ १५४ ॥ पदानि ॥ शेषात्, विभाषा, (कप्) ॥

वृत्तिः ॥ यस्माद्बहुव्रीहेः समासान्तो नविहितः स शेषस्तस्माद्विभाषा कप्प्रत्ययो भवति ॥

154. After all other Bahuvrîhi compounds not covered by the foregoing rules, may optionally be added the affix कप् ॥

Thus बहुखट्वकः or बहुखट्वाकः or बहुखट्वः, बहुमालकः or बहुमालाकः or बहुमालः, बहुवीणकः or बहुवीणः or बहुवीणाकः &c. The word शेष denotes all those Bahuvrîhi about which no special rule has been given above. How do you explain the forms अनृचं साम, बह्वृचं सूक्तं, in which the affix कप् is added, though these words are governed by the general rule V. 4. 74, and ought to have taken the samâsânta affix अ? The affix अ is added to ऋक् when the compound has a special meaning such as अनृचः means 'a boy', बह्वृचः 'a charaṇa'.

Why do we say "after the rest"? Observe प्रियपथः, प्रियधुरः ॥

न संज्ञायाम् ॥ १५५ ॥ पदानि ॥ न संज्ञायाम्, (कप्) ॥

वृत्तिः ॥ संज्ञायां विषये बहुव्रीहौ समासे कप् प्रत्ययो न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते ॥

155. The affix कप does not come after a Bahuvrîhi when a Name is meant.

This debars कप् ordained by the last. Thus विश्वेदेवा अस्य = विश्वेदेवः, विश्वयशाः ॥

ईयसश्च ॥ १५६ ॥ पदानि ॥ ईयसः, च ॥

वृत्तिः ॥ ईयसन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति । सर्वा प्राप्तिः प्रतिषिध्यते ।

156. The affix कप् does not come after a Bahuvrîhi the last member of which ends in the affix ईयस् ॥

This debars all the previous rules. Thus बहवः श्रेयांसोऽस्य = बहुश्रेयान्, here rule V. 4. 154 is debarred. बह्व्यः श्रेयस्योऽस्य = बहुश्रेयसी, here rule V. 4. 153 is prohibited. By rule I. 2. 48 the long final ई ought to have been shortened, but this is not done by considering it as a masculine "ईयसो बहुव्रीहौ पुंवत्" See Vârtika under I. 2. 48.

वन्दिते भ्रातुः ॥ १५७ ॥ पदानि ॥ वन्दिते, भ्रातुः (न कप्) ॥

वृत्तिः ॥ वन्दितेऽर्थे यो भ्रातृशब्दो वर्त्तते तदन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति ॥

157. The affix कप् does not come after a Bahuvrîhi ending in the word bhrâtṛi, when it means 'praised'.

The word वन्दितः means 'praised', 'respected' &c. Thus शोभना भ्राता ऽस्य = सुभ्राता 'one having a good brother'. Why do we say when it means "praised"? Observe मूर्खभ्रातृकः, दुष्टभ्रातृकः ॥

ऋतश्छन्दसि ॥ १५८ ॥ पदानि ॥ ऋतः, छन्दसि, (न कप्) ॥

वृत्तिः ॥ ऋवर्णान्ताद् बहुव्रीहेश्छन्दसि विषये कप् प्रत्ययो न भवति ॥

158. The affix कप् does not come after a Bahuvrîhi ending in short ऋ in the Veda.

Thus हता माताऽस्य = हतमाता, हतपिता, हतस्वसा, सुहोता ॥

नाडीतन्त्र्योः स्वाङ्गे ॥ १५९ ॥ पदानि ॥ नाडी, तन्त्र्योः, स्वाङ्गे (कप्, न) ॥

वृत्तिः ॥ स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति ॥

159. The affix कप् does not come after the words nâḍî, and tantrî final in a Bahuvrîhi, when they mean organs of body.

Thus बह्व्यो नाड्योऽस्य = बहुनाडिः कायः, बहुतन्त्रीर्ग्रीवा ॥ The word तन्त्री means 'artery'. Why do we say meaning "parts of body"? Observe, बहुनाडीकः स्तम्भः, बहुतन्त्रीका वीणा ॥ The word नाडी is a feminine word formed by ङीप् that comes after jâti; तन्त्री is formed by the uṇâdi affix ई (uṇ III. 158). In बहुनाडिः the long ई is shortened as being an upasarjana (I. 2. 48); but the ई of तन्त्री is not shortened, as ई here is not a feminine affix, but a kṛit affix (कृत् स्त्रियाः प्रतिषेधः; See I. 2. 48 also).

निष्प्रवाणिश्च ॥ १६० ॥ पदानि ॥ निष्प्रवाणिः, च ॥

वृत्तिः ॥ निषप्रवाणिरिति नद्दीलक्षणस्य कपः प्रतिषेधो निपात्यते ।

160. The word **निष्प्रवाणि** is irregularly formed, without adding the affix कप्, though the last word is a Nadî word.

The word प्रवाणी means either प्रीयतेऽस्यां or प्रवयन्ति तया ॥ Here ल्युट् is added to the root वि 'to weave': and denotes the instrument of weaving i. e. 'a shuttle'. निर्गता प्रवाणी अस्य = निष्प्रवाणिः पटः, निष्प्रवाणिः कम्बलः = अपनीतशलाकः "a new unbleached cloth or blanket", from which the shuttle has not yet been extracted, fresh from the loom. The न is changed to ण by VIII. 4. 29.

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

Printed by Freeman & Co., Ld., at the Tárá Printing works, Benares.

See pt. I

Noted 28/10/00

Central Archaeological Library,
NEW DELHI.

27186

Call No. Sa4V/Pan/Vas.

Author— Vasu, S.C

Title— Ashtadhyayi of Panini

Borrower No.	Date of Issue	Date of Return

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY
GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.

S. B., 148. N. DELHI.